
काव्यप्रकाशः

३५५

वस्ता
१०

काव्यांशपदोषवर्णन
१८७०

काव्यप्रकाश



काव्यप्रकाश सं० ५१
[illegible] कवि दं गंगाधर [illegible] नाम पत्रा ८२

श्रीध्यान

परतंत्रत्वाद्दृढव ग्राय तवचनः

श्रीगणेशायनमः॥ ग्रंथारंभेविघ्नविघातायसमुचितेष्टदेवतांग्रंथकृत्
परामृशति॥ नियतिकृतनियमरहितांह्लादैकमयीमनन्यपरतंत्रां॥ नवरस
रुचिरांनिर्म्मितिमादधतीभारतीकवेर्जयति॥१॥ नियतिशक्त्यानियतरू
पासुखदुःखमोहस्वभावापरमाण्वाद्युपादानकर्म्मादिसहकारिकार
णपरतंत्राषड्रसानचहृद्यैवतैः एतादृशीब्रह्मणोनिर्म्मितिनिर्माणं॥
एतद्विलक्षणानुकविवाङ्निर्म्मितिरतएवजयतिजयत्यर्थेनचनमस्का
रआक्षिप्यतइतितांप्रणतोस्मीतिलभ्यते॥ इहाभिधेयंसप्रयोजनमि
त्याह॥ काव्यंयशसेर्थकृतेव्यवहारविदेशिवेतरक्षतये॥ सद्यःपरनि

॥१॥ ॥१॥

जोर

वृतये कांतासंम्मिततयोपदेशयुजे॥२॥कालिदासादीनामिव य
शः॥श्रीहर्षादेर्धावकादीनामिव धनं॥राजादिगतोचिताचारपरिज्ञा
नं॥आदित्यादेर्मयूरादीनामिवानर्थनिवारणं॥सकलप्रयोजनमौलि
भूतं समनंतरमेव रसास्वादनसमुद्भूतं विगलितवेद्यांतरमानंदं प्र
भुसंम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संम्मितार्थ[illegible]तात्पर्य
वत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणीभावेन रसांगभूतव्या
पारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुण[illegible]क
विकर्म्म तत्कांतेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्ति
तव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च क

॥२॥

रातीति सर्वथा तत्रपतनीयं॥ एवमस्य प्रयोजनमुक्त्वा कारणमा
ह॥ शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्॥ काव्यज्ञशि
क्षयाभ्यास इति हेतुस्तदुद्भवे॥३॥ शक्तिः कवित्वबीजरूपः संस्का
रविशेषः यां विना काव्यं न प्रसरेत्॥ प्रसृतं चोपहसनीयं स्यात्॥
लोकस्य स्थावरजंगमात्मकलोकवृत्तस्य शास्त्राणां छंदोव्याकरणा
भिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रंथानां का
व्यानां च महाकविसंबंधिनां आदिग्रहणादितिहासादीनां च विम
र्शनाद्व्युत्पत्तिः काव्यं कर्तुं विचारयितुं च ये जानंति तदुपदेशेन क
रणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिता न तु व्य

॥२॥

स्ताः॥तस्यकाव्यस्याङ्गेविनिर्माणेसमुल्लासेचहेतुर्नतुहेतवः॥एवम
स्यकारणतांमुक्त्वास्वरूपमाह॥तद्दोषौशब्दार्थौसगुणावनलंकृती
पुनःक्वापि॥दोषगुणालंकारावक्ष्यंते॥क्वापीत्यनेनैतदाहयत्सर्व
त्रसालंकारौ क्वचित्तुस्फुटालंकारविरहेपिनकाव्यत्वहानिः॥
यथा॥यःकौमारहरःसएवहिवरस्ताएवचैत्रक्षपास्तेचोन्मीलित
मालतीसुरभयःप्रौढाःकदंबानिलाः॥साचैवास्मितथापितत्रसुरत
व्यापारलीलाविधौरेवारोधसिवेतसीतरुतलेचेतःसमुत्कंठते॥
अत्रस्फुटोनकश्चिदलंकारः॥रसस्यहिप्राधान्यान्नालंकारता॥
तद्भेदान्क्रमेणाह॥इदमुत्तममतिशयिनिव्यंग्येवाच्याद्ध्वनिर्बुधैः

कथितः॥ इदमिति काव्यं बुधैः वैकरणैः प्रधानभूतस्फोटरूपव्यं
ग्यव्यंजकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः॥ ततस्तन्मतानु
सारिभिरन्यैरपि न्यग्भावितवाच्यव्यंग्यव्यंजनक्षमस्य शब्दार्थ
युगलस्य॥ यथा॥ निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोधरो नेत्रे
दूरमनंजने पुलकिता तन्वी तवेयं तनुः॥ मिथ्यावादिनि दूति बांध
वजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनस्तस्याधम
स्यांतिकं॥ अत्राधमशब्देन तदंतिकमेव रंतुं गतासीति प्राधान्येन व्यज्य
ते॥ अतादृशि गुणीभूतव्यंग्यं व्यंग्ये तु मध्यमं॥ अतादृशि वाच्यादन
तिशायिनी॥ यथा॥ ग्रामतरुणं तरुण्या नववंजुलमंजरीसनाथ

3

॥३॥

करं॥पश्यंत्याभवतिमुहुर्नितरांमलिनामुखछाया॥अत्रवंजुललता
गृहेदत्तसंकेतानागतेतिव्यंग्यंगुणीभूतं॥तदपेक्षयावाच्यस्यैवचमत्का
रित्वात्॥शब्दचित्रंवाच्यचित्रमव्यंग्यंगुणीभूतं॥तदपेक्षयावाच्यस्यैव
त्ववरंस्मृतं॥चित्रमितिगुणालंकारयुक्तं॥अव्यंग्यमितिस्फुटप्रतीयमा
नार्थरहितंअवरमधमंस्मृतं॥यथास्वच्छंदोच्छलदच्छकच्छकुहरच्छा
तेतरांबुच्छटामूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नायवः॥भिंद्यादु
द्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुमद्रोहोद्रेकमहोर्मिमेदुरमदामंदाकिनी
मंदतां॥विनिर्गतंमानदमात्ममंदिराद्भवत्युपश्रुत्ययदृच्छयापियं॥ससंभ्र
मेंद्रद्रुतपातितार्गलानिमीलिताक्षीवभियामरावती॥इतिकाव्य

ग

त्र्कांशप्रथमोल्लासः॥ क्रमेण शब्दार्थयोः स्वरूपमाह॥ स्याद्वाचको लाक्ष

णिकः शब्दोऽत्र व्यंजकस्त्रिधा॥ अत्रेति काव्ये एषां स्वरूपं वक्ष्यते॥ वाच्या

दयस्तदर्थाः स्युः वाच्यलक्ष्यव्यंग्याः॥ तात्पर्यार्थोऽपि केषुचित्॥ आकां

क्षायोग्यतासंनिधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये ता

त्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवा

दिनां मतं॥ वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः॥ सर्वेषां प्रायशोऽर्था

नां व्यंजकत्वमपीष्यते॥ तत्र वाच्यस्य यथा॥ माए घरोवअरणं अज्ज हु णत्थि

त्ति साहिअं तुमए॥ ता भण किं करणिज्जं एमेअ ण वासरो ठाइ॥

अत्र स्वैरविहारार्थिनीति व्यज्यते॥ लक्ष्यस्य यथा॥ साहेंती सहि सुहअं

मतं ४

॥ ४ ॥

साहयंतीतिवा॰पाठ

साधयंति सखि सुभगं

साधयंती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते॥ सद्भावस्नेहकरणीयसदृशं तावद्विरचितं त्वया॥

सुहअ खणे खणे दूम्मिआसि मज्झ कए॥ सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए॥ अत्र मम प्रियं रमयंत्या त्वया शत्रुत्वमाचरितमिति लक्ष्यं तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यंग्यं॥ व्यंग्यस्य यथा॥ उअ णिच्चलणिप्फंदा भिसिणीपत्तम्मि रेहइ वलाआ॥ णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्तिव्व॥ अत्र निस्पंदत्वेनाश्वस्तत्वं। तेन जनरहितत्वं॥ अतः संकेतस्थानमिति कयाचित्कंचित्प्रत्युच्यते॥ अथवा मिथ्या वदसि न त्वमत्रागतो भूरिति व्यज्यते॥ वाचकादीनां क्रमेण स्वरूपमाह॥ साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः॥ इहागृहीतसंकेतस्य पुरुषस्य शब्दोऽर्थविशेषप्रतिपत्तेरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यत्र

पश्य निश्चलनिष्पंदा बिसिनीपत्रे राजति बलाका॥ निर्मलमरकतभाजनपरिस्थिता शंखशुक्तिरिव॥

अई४

८२

5

व्यवधानेनसंकेतोगृह्यतेसतस्यवाचकः॥संकेतितश्चतुर्भेदोजात्यादि
र्जातिरेववा॥यद्यप्यर्थक्रियाकारितयाप्रवृत्तिनिवृत्तियोग्याव्यक्तिरेव
तथाप्यानन्त्याद्व्यभिचाराच्चतत्रसंकेतःकर्तुंनयुज्यतइतिगौःशुक्लश्चलो
डित्थइत्यादीनांशब्दानांविषयविभागश्चनप्राप्नोतीतितदुपाधावेव
संकेतः॥उपाधिश्चद्विविधःवस्तुधर्मोवक्तृयदृच्छासंनिवेशितश्च॥व
स्तुधर्मोपिद्विविधः॥सिद्धःसाध्यश्च॥सिद्धोपिद्विविधः॥पदार्थस्यप्राण
प्रदोविशेषाधानहेतुश्चतत्राद्योजातिः॥उक्तंहि॥वाक्यपदीयेगौःस्वरू
पेणनगौर्नाप्यगौर्गोत्वाभिसंबंधात्तुगौरिति॥द्वितीयोगुणः॥शुक्लादि
नाहिलब्धसत्ताकंवस्तुविशिष्यते॥साध्यःपूर्वापरीभूतावयवःक्रि

स्य ४

॥५॥

याऽऽरूपः॥ डित्थाडित्थादिशब्दानां अंत्यबुद्धिनिर्ग्राह्यं संहृतक्रमस्वरूपं वक्त्रा
यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यत इति संज्ञारूपो यदृ
च्छात्मक इति॥ गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्ति
रिति महाभाष्यकारः॥ परमाण्वादीनां गुणमध्यपाठात्पारिभा
षिकं गुणत्वं गुणक्रियायदृच्छाशब्दानां वस्तुत एकरूपाणामप्या
श्रयभेदाद्भेद इव लक्ष्यते॥ यथैकस्य मुखस्य खड्गमुकुरतैलाद्या
लंबनभेदात्॥ हिमपयःशंखाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्ला
दिषु यद्वशेन शुक्लः शुक्लः शुक्ल इत्यादिरभिन्नाभिधानप्रत्ययो
त्पत्तिस्तच्छुक्लादिसामान्यं॥ गुडतंडुलादिषु पाकमेव पाकादित्वं॥ बा

त्वा।

डित्थाद्यर्थेषु वा

लवत्स्वकुशकाद्यस्तदीरितेषु डित्थादिशब्देषु च जातिक्षणं भिद्यमानं डि डित्थाद्यर्थेषु।
त्थादित्वमस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्य
न्ये तद्वानपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रंथगौरवभयात्तत्र त्व
तानुपयोगाच्च न दर्शितः॥ स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्या
भिधोच्यते॥ स इति साक्षात्संकेतितः अस्येति शब्दस्य मुख्यार्थबा
धे तद्योगे रूढितोऽथ प्रयोजनात् अन्योऽर्थो लक्ष्यते यत्सा लक्षणा
रोपिता क्रिया॥ कर्मणि कुशल इत्यादौ दर्भग्रहणाद्ययोगात् गं ॥६॥
गायां घोष इत्यादौ च गंगादीनां घोषाधिकरणत्वासंभवात् मुख्या
र्थस्य बाधे विवेचकत्वादौ सामीप्यादौ संबंधे रूढितः प्रसि

6

तथा गंगा तटे घोष इत्यादेः प्रयोगाद्येषां तथा न प्रतिपत्तिस्तेषां पा
वनत्वादीनां तथा प्रतिपादनात्मनः प्रयोजनात्॥ मुख्येनामुख्यार्थे
लक्ष्यते यत्स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा॥
स्वसिद्ध्ये पराक्षेपः परार्थं स्वसमर्पणं॥ उपादानं लक्षणं चेत्युक्ता
शुद्धैव सा द्विधा॥ कुंताः प्रविशंति यष्टयः प्रविशंति इत्यादौ कुंतादिभि
रात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यंते। तत उपा
नेर दानैयं लक्षणा॥ गौरनुबंध्य इत्यादौ श्रुतिनोदितमनुबंधनं कथं
मे स्यादिति जात्या व्यक्तिराक्षिप्यते॥ न तु शब्देनोच्यते॥ विशेष्यं नाभि
धा गच्छेत्क्षीणशक्तिर्विशेषण इति न्यायात् उपादानलक्षणा

7

नोदाहृतं व्याप्त्या॥ न ह्यत्र प्रयोजनमस्ति॥ न वा रूढिरियं व्यक्त्यविनाभा
वित्वात्तु जात्या व्यक्तिराक्षिप्यते॥ यथा क्रियतामित्यत्र कर्त्ता॥ कुर्वीत्य
त्र कर्म प्रविश पिंडीमित्यादौ गृहं भक्षयेत्यादौ च पीनो देवदत्तो दिवा न
भुक्त इत्यत्र च रात्रिभोजनं न लक्ष्यते॥ श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य
विषयत्वात्॥ गंगायां घोष इत्यत्र तटस्य घोषाधिकरणतासिद्ध्ये गं
गाशब्दः स्वार्थं समर्पयति॥ इत्येवमादौ लक्षणेनैषा लक्षणा॥ उभयरू
पा चेयं शुद्धा॥ उपचारेणामिश्रत्वात्॥ अनयोर्लक्ष्यस्य लक्षक
स्य च न भेदरूपं ताटस्थ्यं॥ तटादीनां गंगादिशब्दैः प्रतिपादने न तत्त्व ॥६॥
प्रतिपत्तौ प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः गंगासंबंधमात्रप्र

तीतौ तु गंगातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणयाः को भेदः
सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा॥ आरोप्यमाण आरोप्य
विषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्ष
णा सारोपा॥ विषय्यंतःकृतेन्यस्मिन्सा स्यात्साध्यवसानिका॥ वि
षयिणा आरोप्यमाणेनांतःकृते निगीर्णेन्यस्मिन्नारोपविषये स
ति सा साध्यवसानिका॥ भेदाविमौ च सादृश्यात्संबंधांतरतस्तथा॥
गौणौ शुद्धौ च विज्ञेयौ इमौ सारोपाध्यवसानरूपौ सादृश्यहेतू भे
दौ गौर्वाहीक इत्यत्र गौरयमित्यत्र च॥ अत्र हि स्वार्थसहचारिणा गु
णा जाड्यमांद्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्र

वृत्तिनिमित्तत्वमुपयांतीति तिवेचित् ॥ स्वार्थसहचारिणा भेदेन परा
र्थगता गुणा एव लक्ष्यं तेन तु परार्थोभिधीयत इत्यन्ये ॥ साधारणगुणा
श्रयेण परार्थ एव लक्ष्यत इत्यपरे ॥ उक्तं च ॥ अभिधेयाविनाभूतप्रती
तिर्लक्षणेच्यते ॥ लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥ अवि
नाभावोत्र संबंधमात्रं ॥ न तु नांतरीयकत्वं ॥ तत्त्वे हि मंचाः क्रोशंती
त्यादौ लक्षणा न स्यात् ॥ अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणायाः
योग इत्युक्तं ॥ आयुर्घृतमायुरेवेदमित्यादौ सादृश्यादन्यत्कार्यका
रणभावादिसंबंधांतरं ॥ एवमादौ च कार्यकारणभावादिलक्षणापू
र्वकसारोपाध्यवसाने ॥ अत्र गौणी भेदयोर्भेदे पिताद्रूप्यप्रतीतप्रसिद्धिः ॥

॥१८॥

सर्वथैवाभेदावगमश्च गयोजनं शुक्लभेदयोस्त्वन्यैर्लक्षणेन अव्यभिचा
रेण च कार्यकारित्वादि क्वचित्तादर्थ्यादुपचारः यथा इन्द्रार्थाः स्थूणा इन्द्र
क्वचित्स्वस्वामिभावात्॥ यथा राजकीयः पुरुषो राजा क्वचिदवयवावयवि
भावात् अग्रहस्त इत्यत्राग्रमात्रे अवयवे हस्तप्रयोगः क्वचित्तात्कर्म्यात्॥ अत
क्षा तक्षा लक्षणेन षड्विधा॥ आद्ये द्वे व्यंग्यासहस्वाच्च व्यंग्येन रहितारू
ढौ सहितावुप्रयोजने॥ प्रयोजनं हि व्यंजनाव्यापारगम्यमेव॥ तच्च गूढमगूढं वा॥ तच्चेति व्यं [illegible]॥ गूढं यथा॥ मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः॥ उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते॥

ल ५

घ ५

अगूढंयथा॥ श्रीपरिचयाज्जडा अपि भवंत्यभिज्ञा विदग्धचरि
तानां॥ उपदिशति कामिनीनां यौवनमद एव ललितानि॥ अत्रोपदि
शतीत्यनायासेन शीक्षादानमभिधेयवत्स्फुटं प्रतीयते॥ तदे
षा कथिता त्रिधा॥ अव्यंग्या गूढा गूढव्यंग्या वा॥ तद्रूढौ लक्षणा व्यं
ग्यरहितः॥ शब्द इति संबध्यते॥ तद्रूढत्वे आश्रयः॥ तत्र व्यापारो व्यंजनात्मकः॥ कुत इत्याह॥ यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते॥
फले शब्दैकगम्येऽत्र व्यंजनान्नापरा क्रिया॥ प्रयोजनप्रतिपिपाद
यिषया यत्र लक्षणा शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्तिरपि तु त
स्मादेव शब्दात् न चात्र व्यंजनादृते अन्यो व्यापारः॥ तथाहि॥ नाभिधा

॥ २०

न४

नाभिधासमयाभावात्॥ गंगायां घोष इत्यादौ ये पावनत्वादयो धर्मास्त
टादौ प्रतीयंते न तत्र गंगादिशब्दाः संकेतिताः॥ हेत्वभावान्न लक्ष
णा॥ मुख्यार्थबाधादित्रयं हेतुः तथा च॥ लक्ष्यं न मुख्यं नाप्यत्र बा
धा योगः फलेन नो प्रयोजनमेतस्मिन्न च शब्दः स्खलद्गतिः॥ य
था गंगाशब्दः स्रोतसि सबाध इति तटं लक्षयति॥ तद्वद्यदि त
टेपि सबाधः स्यात्तदा तत्प्रयोजनं लक्षयेत्॥ न च तटं मुख्योर्थः॥ ना
प्यत्र बाधा॥ न च गंगाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सं
बंधः॥ नापि प्रयोजने लक्षणीये किंचित्प्रयोजनं नापि गंगाशब्दस्तट ऽतद्
मिव प्रयोजनं प्रतिपादयितुमसमर्थः॥ एवमप्यनवस्था स्याद्या मूलक्षति

दपि

क्षयंकारिणी॥ एवमपीति प्रयोजनं चेल्लक्ष्यते॥ तत्प्रयोजनान्तरेण
तदपि प्रयोजनांतरेणेति प्रकृतार्थप्रतीतिखदनवस्था स्यात्॥ न
तु पावनत्वादिविशिष्टमेव तटं लक्ष्यते॥ गंगायास्तटे घोष इत्यतोऽधिक
स्यार्थस्य प्रतीतिः प्रयोजनमिति विशिष्टे लक्षणा॥ तत्किं व्यंजनेनेत्या
ह॥ प्रयोजनेन सहितं लक्षणीयं न युज्यते॥ कुत इत्यत आह॥ ज्ञानस्य
पा४ विषयो ह्यन्यः फलमन्यदुदाहृतं॥ प्रत्यक्षादेर्हि नीलादिर्विषयः फलं तु प्र
कटता संवि[illegible]त्तिर्वा॥ विशिष्टे लक्षणा नैवं॥ व्याख्यातं॥ विशेषाः स्युस्तु ॥१०॥
लक्षिते। तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधालक्षणातात्पर्ये
भ्यो व्यापारांतरेण गम्याः॥ तच्च व्यंजनध्वनन

त्स्थापनादिशब्दवाच्यमवश्यमेषितव्यं॥ एवंलक्षणाबीजं व्यंग्ययुक्त
मभिधामूलं व्याहः॥ अनेकार्थस्य शब्दस्य वाचकत्वे नियंत्रिते संयोगाद्यैरवा
च्यार्थधीकृद्व्यापृतिरंजनं॥ संयोगो विप्रयोगश्च साहचर्यं विरोधिता॥ अ
र्थः प्रकरणं लिंगं शब्दस्यान्यस्य संनिधिः। सामर्थ्यमौचिती देशः कालो
व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ इत्युक्तदिश॥
सशंखचक्रो हरिरिति हरिशब्दो विष्णौ नियम्यते। रामलक्ष्मणाविति दा
शरथौ। रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः। स्थाणुं भज भव
च्छिदे इति हरे वा। सर्वं जानाति देव इति युष्मदर्थे। कुपितो मकरध्वज इ
ति कामे। देवस्य त्रिपुरारातेरिति शंभौ। मधुना मत्तः कोकिल इति वसंते॥

शंखचक्रोहरि ४४

नि १

पातुवोदयितामुखमितिसांमुख्ये॥भात्यत्रदेवईराजधानीरूपाद्देशाद्धा
म्निंचित्रभानुर्विभातीतिइतिदिवारवौरात्रौवह्नावितिमित्रंभातीतिसुह
दिमित्रोभातीतिरवौ॥इंद्रशत्रुरित्यादौवेदएवनकाव्येस्वरोविशेषप्र
तिपत्तिकृत्॥आदिग्रहणाच्चेष्टादेः एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिंअ
च्छिवत्तेहिं॥एद्दहमेत्तावत्थाएद्दहमेत्तेहिंदिअएहिं इत्यादावभिनयः॥
इत्थंसंयोगादिभिरर्थान्तराभिधायकत्वेनियंत्रितेयदनेकार्थशब्दस्य
क्वचिदर्थान्तरप्रतिपादनंतत्रनाभिधानियमनात्तस्याः॥नलक्षणामुख्या
र्थबाधाद्यभावात्॥अपित्वंजनमेवव्यापारः॥यथाभद्रात्मनोदुरधिरो
हतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्यायस्यानुपप्लुतवृ

१४

नि ८

॥११॥

वंसन २

तत्रन अभिधा ३

गतेः परदाराणांसक्तानां पुंसेवकसुन गः सततं करोमद्भुतं तद्ध्वक्तो व्यंजकः श
ष्टः॥ तद्ध्वक्तो व्यंजनव्यापारमुक्तः॥ यत्सोर्थांतरयुक्तकथा॥ अर्थोपि व्यंज
कस्तत्र सहकारितया मतः॥ तथेति व्यंजकः॥ इति काव्यप्रकाशे द्वितीयो
ल्लासः॥ अर्थाः प्रोक्ताः पुरा तेषां॥ अर्थावाच्यलक्ष्यव्यंग्याः॥ तेषां वाचक
लाक्षणिकव्यंजकानां॥ अर्थव्यंजकतोच्यते। कीदृशी त्याह॥ वक्तृबोधव्य
काकूनां वाक्यवाच्यान्यसंनिधेः॥ प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभा
जुषां॥ योर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा॥ बोद्धव्यः प्रतिपाद्यः॥
काकुर्ध्वनेर्विकारः॥ प्रस्तावः प्रकरणं॥ अर्थस्य वाच्यलक्ष्यव्यंग्यस्य। क्र
मेणोदाहरणं॥ अइपिहुलं जलकुंभं घेत्तूण समागदह्मि सहि तुरिअं॥
सा समसेअसलिलणीसासणीसहा वीसमामि खणं॥ अत्र चौर्यरतगोपनं गम्य लीस
अतिपृथुलं जलकुं[illegible]भं गृहीत्वा समागतास्मि सखि त्वरितं। श्रमस्वेदस
लिलनिःश्वसहा निःश्व विश्राम्यामि क्षणं॥ २
श्वा

औन्नि घृद्धु र्वल त्वं चिंतानलसत्वं सनि ञ्चसितं। मम मंदभागिन्याः कृते स[illegible]रिवल्लहरु त्वामपि परिभवति।

तेण उक्खित्तदूदोव्वलुंचिंताअलसत्तणं। सा एणी सामिअ। महमंदभाइणीए केरंसाहिं अहहलुह विपमिहवइ॥ अत्र हृत्यास्तत्कामुकोपभोगो व्यज्यते। तथाभूतां च पसदसि पांचालतनयां वने व्याधैः साधं सुचिरमुषितं वल्कलधरैः वैराटस्यावासेस्थितमनुचितारंभनिभृतं गुरुः खेदं खिन्ने मयि भजाति नाद्यापि कुरुषु॥ अत्र मयि न योग्यः खेदः कुरुषु योग्य इति काकुः। अभिव्यज्यते॥ न च वाच्यसिध्यंगमत्र काकुरिति गुणीभूतव्यंग्यत्वं शंक्यं। प्रश्नमात्रेणापि काकोर्विश्रांतेः॥ तइआमहगंडत्थलणिमिअं दिट्ठिं ण णेसि अण्णतो एहिं सच्चेअ अहं ते अ कवोला ण सा दिट्ठी॥ अत्र मत्सखीकपोलप्रतिबिंबितां पश्यतस्ते दृष्टिरन्येवाभूत्‌ चलितायां तु तस्यामन्येव वर्तते इति भाव

तदा मम गंडस्थलनिमग्नां दृष्टिं न नयसि अन्यतः। इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः॥ ३

स

णो ह्लेइ अण्णह्ल मणअत्ता मं घरभरंमि सअलम्मि ॥ रवणमेत्तंजइ मं आइहोइणव होइवीसामो

तेयहोयच्छन्नक्कामुकत्वेतेइतिथ्यप्यते॥ उद्दिश्यायंसरसकदलीश्रेणिशोभातिशायिकुंडोल्कर्षाकुशितरमणीविभ्रमोनर्मदायाः॥ किंचैतस्मिन्सुरतसुहृदस्तन्वितेवांतिवाताथेषामग्रेसरतिकलिनाकांडकोपोमनोमेः अत्रवर्थांतोप्रविशेतिव्यंग्यं॥ नोदयत्यनाद्रिमनाःश्वश्रूर्मांगृहभरे सकले॥ क्षणमात्रंसंध्यायांभवतिनवाविश्रामः॥ अत्रसंध्यासंकेतितःकालइतिकयाचित्कंचित्प्रतिद्योत्यते॥ खुबइसमागमिस्सदितुझ्झपिओअज्जुपहरमत्तेण॥ एमेअकिंचिमिसतासाविसज्जेसुकरणिज्जं॥ अत्रोपपत्तिप्रश्यमिसत्तुंप्रस्तुतानिवार्यते॥ अन्यत्रयूयंकुसुमावचेयंकुरुध्वमत्रास्मिकरोमिसख्यः॥ नाहंहिदूरंभ्रमितुंसमर्थाप्रसीदतायंरचितोमयाञ्जलिः॥ अत्रपतेसमागमिष्यतितवप्रियोद्यप्रहरमात्रेण। एवमेववकिंतिष्ठसितत्सखिसज्जयस्वकरणीयं॥ ४

तव
गुरुजनपरवशा प्रियकिं वदामि मंदभागिन्यहं। अद्य प्रवासे व्रजसि व्रजतुं न
स्वयमेव श्रोष्यसि करणीयं ॥२

प्रसीदतायं रचितोंजलिर्वः॥ अत्र विविक्तोयं देश इति प्रच्छन्नकामुकः स
मानेयइत्याश्वस्तां प्रति कयाचित्प्रोच्यते। गुरुजनपरवशमपि अकिं जण
मिमंदभाओणी अ अहं। अज्ज पवासं वच्चसि तो वच्चसु अमे अ सुणसि
करणिज्जं॥ अत्रैव मधुसमये यदि व्रजसि तदहं तावन्न भवामि तव तु न
ज्ञानामि गतिमिति व्यज्यते। आदिग्रहणाच्चेष्टादेः॥ यथा॥ द्वारोपांतनि
रंतरे मयि तया सौंदर्यसाराश्रिया प्रोल्लास्योरुयुगं परस्परसमासक्तं स
मासादितं॥ आनीतं पुरतः शिरोंशुकमधः क्षिप्ते चले लोचने वाचस्तत्र
निवारितं प्रसरणं संकोचिते दोर्लते॥ अत्र चेष्टया प्रच्छन्नकामुकविष
य आकूतविशेषो ध्वन्यते। निराकांक्षप्रतिपत्तये प्राप्तावसरतया पुनः
पुनरुदाह्रियते॥ वक्त्रादीनां मिथः संयोगे द्विकादिभेदेपि अनेन क्रमेण

तुह
13

जे धु
॥१३॥
प्रा २

अत्र श्वश्रूर्निमज्जति अत्राहं दिवस एव सलोकय। मा पथिक रात्र्यंध मम शय्यायां निपतिष्यसि।

लक्ष्यव्यंग्ययोश्च व्यंजकत्वमुदाहार्यं। दिङ्मेदे वक्तृबोद्धव्ययोगे यथा॥ अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसएपुलोएहि॥ मा पहिअ रत्तिअंधअ सज्जाए मअं णिमज्जिहिसि॥ शब्दप्रमाणवेद्योर्थो व्यनक्त्यर्थांतरं यथा तः अर्थस्य व्यंजकत्वे तच्छब्दस्य सहकारिता॥ शब्देति न हि प्रमाणांतरवेद्यो व्यंजकः॥ इति काव्यप्रकाशे तृतीय उल्लासः॥ अद्यापि शब्दार्थनिर्णये कृते दोषगुणालंकाराणां स्वरूपमभिधानीयं तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह॥ अविवक्षितवाच्यो यस्तत्र वाच्यं भवेत् ध्वनौ॥ अर्थांतरे संक्रमितमत्यंतं वा तिरस्कृतं॥ लक्षणामूलगूढव्यंग्यप्राधान्ये सत्यविवक्षितं वाच्यं यत्र स ध्वनावित्यनुवादात् ध्वनिरिति ज्ञेयः॥ तत्र वाच्यं क्वचि[illegible]दनुपयुज्यमानत्वादर्थांतरे परिणमितं। यथा। त्वामस्मि व

अत्र वक्तृबोद्धव्यवैशिष्ट्याभ्यां ममशय्यायामेव पतिष्यतीति व्यंग्यं॥८

सं अं २

अर्थो ४

सप्रभेदः

क्ष्मा विदुषां समुदायोत्र तिष्ठति॥ आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्॥
अत्र वचनादुपदेशरूपतया परिणमति॥ क्वचित्तु अनुपपद्यमानत्वादस्य त-
त्तिरस्कृतं यथा॥ उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परं॥ विदध-
दीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतं॥ एतदपकारिणं प्रति विप-
रीतलक्षणया कश्चिद्वक्ति॥ विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः॥ अन्यप-
रं व्यंग्यनिष्ठं॥ एष च कोप्यलक्ष्यक्रमव्यंग्यो लक्ष्यव्यंग्यक्रमः परः॥ अलक्ष्येति॥
न खलु विभावानुभावव्यभिचारिण एव रसः किंतु रसस्तैरित्यस्ति क्रमः स तु न
लक्ष्यते॥ रसभावतदाभासभावशांत्यादिरक्रमः॥ भिन्नो रसाद्यलंकारादलंका-
र्यतया स्थितः॥ आदिग्रहणाद्भावोदयभावसंधिभावशबलत्वानि॥ प्रधानत-
या यत्र रसादिस्तत्रालंकार्यो यथोदाहरिष्यते अन्यत्र तु प्रधाने वाक्यार्थे यत्रां

ध्व
दी
१५
पु२
॥१४॥

गमनोरसादिस्तत्रमुरारीभूतव्यंग्येरसवत्प्रेयउर्जस्विसमाहि
तादयोलंकारास्ते चगुरीभूतव्यंग्याभिधानएवोदाहरिष्यंते।।
तत्ररसस्वरूपमाह।। कारणान्य॰॰ थ कार्याणिसहकारिणि
यानि चा।। रत्यादेःस्थायिनोलोके तानिचेन्नाट्यकाव्ययोः।।
विभावा अनुभावास्तत्कथ्यंते व्यभिचारिणः।। व्यक्तःसतैर्वि
भावाद्यैःस्थायीभावोरसःस्मृतः।। रत्या।। उक्तं हि भरतेन।।
विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति।। एत
द्विवरावते।। विभावैर्ललनोद्यानादिभिरालंबनोद्दीपन
कारणैःस्थायिरत्यादिको भावोजनितः।। अनुभावैःकटा
क्षभुजोतक्षेपप्रभृतिभिःकार्यैःप्रतीतियोग्यः।। व्यभि

चारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या

रामादावनुकार्ये तद्रूपानुसंधानान्नर्तकेपि प्रतीयमानो र

स इति भट्टलोल्लटप्रभृतयः॥ राम एवायमयमेव राम इति

न रामो यमित्युत्तरकालिके बाधे रामोयमिति रामः स्या

द्वा न वेति रामसदृशो यमिति च सम्यङ्मिथ्यासंशयसादृ

श्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोय

मिति प्रतीत्या ग्राह्ये नटे सर्पं मर्मा गे षु स्तु चारसच्छ स्तु

परस्कर्पूर शलाकिको दृशोः॥ मनोरथश्रीर्मनसः शरी

रीरि प्राणेश्वरी लोचनगोचरं गते। देवादहमद्य तन

राम

॥१५॥

15

याश्चपलायतनेत्रयाविपुलकश्च्या॥ अविरलविलोलजलदः कालः
समुपागतश्चायमिसौकाव्यानुसंधानबलाच्छिक्षाभ्यासनिर्व
र्तितस्वकार्यप्रकटनेनचनटेनैवप्रकाशितैः कारणकार्यसह
कारिभिः कृत्रिमैरपितथाऽनभिमन्यमानैर्विभावादिशब्दव्य
पदेश्यैः संयोगाद्गम्यगमकभावरूपादनुमीयमानोपिव
स्तुसौंदर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः
स्थायित्वेनसंभाव्यमानोरत्यादिर्भावस्तत्रासन्नपिसामा
जिकानांवासनया चर्व्यमाणोरसइति श्रीशंकुकः॥ नतोस्थे
ननाम्नगतत्वेनसेरैःप्रतीयते नोत्पद्यतेनाभिव्यज्यतेअ
पितुकाव्येनाद्येचाभिधायतोद्वितीयेनविभावादिसाधारणी
करणात्मनाभावकत्वव्यापारेणभाव्यमानस्थायीसत्वोद्रे

कप्रकाशानंदमयसंविद्विश्रांतिसतत्वेन भोगेन भुज्यत इति भट्टनायकः॥
लोके प्रमदादिभिः कारणादिभिः स्थाय्यनुमानाभ्यासपाटववतां काव्ये ना-
ट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्वादलौकि-
कविभावादिशब्दव्यवहार्यैर्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न
ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति संबंधविशेषस्वीकार-
परिहारनियमानध्यवसायात्साधारण्येन प्रतीतैरभिव्यक्तः सामाजि-
कानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितो-
पि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमातृभाववशोन्मि-
षितवेद्यांतरसंपर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसं-
वादभाजा साधारण्येन स्वाकार इवाभिन्नोपि गोचरीकृतश्चर्व्यमाणता-
तैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः
पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वांगीणमिवालिंगन्नन्य-
त्सर्वमिव तिरोदधत्॥ ब्रह्मास्वादमिवानुभावयन्नलौकिकचम-
त्कारकारी शृंगारादिको रसः॥ स च न कार्यो विभावादिनाशेपि तस्य संभ-
वप्रसंगात्॥ नापि ज्ञाप्यः॥ सिद्धस्य तस्याभावात्॥ अपि तु विभावादि-

16

धा६

राम.

भिर्व्यंजितश्च वर्णनीयः॥ कारकलापकाभ्यामन्यत् धं दृष्टमिति चेत् न क्वचि
दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणं॥ चर्वणानिष्पत्त्या तस्य नि
ष्पत्तिरुपचरितेति कार्योऽप्युच्यतां लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोध
शालिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयो
गिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयतां॥ त — येप
द्ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शनप्रधानत्वात्॥ नापि सविकल्प
कं चर्व्यमाणस्यालौकिकानंदमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभाव
रूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधं इति
श्रीमदाचार्याभिनवगुप्तपादाः॥ ४॥ व्याघ्रादयो विभावा भयानकस्येव वीरा — रस ९
द्भुतरौद्राणां॥ अश्रुपातादयोऽनुभावाः शृंगारस्येव करुणाभयानकयोः॥
चिंतादयो व्यभिचारिणः शृंगारस्येव वीरकरुणाभयानकानां इति पृथगनैकां
तिकत्वात्सूत्रे मिलिता निर्दिष्टाः॥ विपदलिमलिनांबुगर्भमेघं मधुकरकोकिल
कूजितैर्दिशां श्रीः॥ धरणीरभिनवांकुरांकटंका प्रणतिपरे दयिते प्रसीद मुग्धे
इत्यादौ परिमर्दितमृणालीम्लानमंगं प्रवृत्तिः कथमपि परिवारप्रार्थना

भिः क्रियासु कलयति च हिमांशोर्निःकलंकस्य लक्ष्मीमभिनवकरिदंतच्छेदपांडुः
कपोलः इत्यादौ दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं संश्लिष्यत्य
रुणं गृहीतवसने किंचांचितभ्रूलतं मानिन्याश्चरणानतिव्यतिकरे बाष्पां
बुपूर्णेक्षणं चक्षुर्जातमहो प्रपंचचतुरं जातागसि प्रेयसि इत्यादौ च। य
द्यपि विभावानामनुभावानामौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानां
च व्यभिचारिणां केवलानामत्र स्थितिस्तथाप्येतेषामसाधारणत्व
मित्यन्यतमद्वयाक्षेपकत्वे सति नानैकांतिकत्वमिति॥ तद्विशेषानाह
शृंगारहास्यकरुणरौद्रवीरभयानकाः॥ बीभत्साद्भुतसंज्ञौ चेत्यष्टौ
नाट्ये रसाः स्मृताः॥ तत्र शृंगारस्य द्वौ भेदौ संभोगो विप्रलंभश्च।
तत्राद्यः परस्परावलोकनालिंगनपरिचुंबनाद्यनंतभेदत्वादपरिच्छेद्य
इत्येक एव गण्यते यथा शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचि
च्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं॥ विस्र
ब्धं परिचुंब्य जातपुलकामालोक्य गंडस्थलीं लज्जानम्रमुखी
प्रियेण हसता बाला चिरं चुंबिता॥ तथा॥

शिव

त्वंमुग्धाक्षिविनैवकंचुलिकयाधत्सेमनोहारिणींलक्ष्मीमित्यभिधायिनिप्रि
यतमेतद्वीटिकासंस्पृशि॥शय्योपांतनिविष्टसस्मितसखीनेत्रोत्सवानंदितोनि
र्यातःशनकैरलीकवचनोपन्यासमालीजनः॥अपरस्त्वभिलाषविरहेर्ष्याप्रवा
सशापहेतुकइतिपंचविधः॥क्रमेणोदाहरणानि॥प्रेमार्द्राःप्रणयस्पृशःपरिच
याद्गाढरागोदयास्तास्तामुग्धदृशोनिसर्गमधुराश्चेष्टाभवेयुर्मयि॥यास्वं
तःकरणस्यबाह्यकरणव्यापाररोधीक्षणादाशंसापरिकल्पितास्वपिभवत्या
नंदसांद्रोलयः॥अन्यत्रव्रजतीतिकाखलुकथानाप्यस्यतादृक्सुहृद्योमांनेच्छ
तिनागतश्चसहसाकोयंविधेःप्रक्रमः॥इत्यल्पेतरकल्पनाकवलितस्वांतानि
शांतांतरेबालावृत्तविवर्तनव्यतिकरैर्नानैतिनिद्रांनिशि॥एषाविरहोत्कंठि
ता॥सापरस्तुप्रथमापराधसमयेसख्योपदेशंविनानोजानातिसविभ्रमांग

शौ २

18

वलनावक्रोक्तिसंसूचनं ॥ स्वच्छैरच्छकपोलमूलपतितैः पर्यस्तनेत्रोत्पला बा
लाकेवलमेव रोदिति लुठल्लोलोदकैरश्रुभिः । प्रस्थानं वलयैः कृतं प्रियसखैर्वै
रस्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः ॥ यातुं निश्चित
चेतसि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवित प्रियसुहृत्सार्थः किमु
स्त्यज्यते ॥ श्यामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते चरणपति
तं यावदिच्छामि कर्तुं ॥ अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालोप्यते मे क्रूरस्तस्मि
न्नपि न सहते संगमं नौ कृतांतः ॥ हास्यादीनां क्रमेण स्वरूपमाह ॥ आकुंच्यमशु पाणि
चिं मम मूर्ध्नि वेश्या मंत्रांभसां प्रतिपदं पृषतैः पवित्रे तारस्वरं प्रहितथूत्कम ॥१८॥
दात्प्रहारं हा हा हतोऽहमिति रोदिति विष्णुशर्मा ॥ हा मातस्त्वरितासि कुत्र किमि
दं हा देवताः क्वाशिषो धिक्प्राणान्पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ ॥

इत्थं घर्घरमध्यरुद्धकरुणाः पौरांगनानां गिरश्चित्रस्थानपि रोदयंति शत
धाकुर्वंति भित्तीरपि॥ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्म
र्यादैर्भवद्भिरुदायुधैः॥ नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयमहमसृ
ङ्मेदोमांसैः करोमि दिशां बलिं॥ क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रे
भकुंभा युष्मद्गात्रेषु लज्जां दधति परममी सायका निःपतंतः॥ सौमित्रे तिष्ठ
पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किंचिद्भ्रूभंगलीलानियमितजल
धिं राममन्वेषयामि॥ ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने बद्धदृष्टिः पश्चा
र्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं॥ दर्भैरर्धावलीढैः श्रमविवृत
मुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां

सदाशिव

ग्रयात्ति॥उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेदभूयांसि मांसान्यंसस्फि
क्पृष्ठपिंडाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा॥आर्त्तः पर्यस्तनेत्रः प्रकटि
तदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥ म२
१९ चित्रं महानेष बतावतारः क्व कांतिरेषाभिनवैव भंगिः॥लोकोत्तरं धैर्यमहो
प्रभावः॥काप्याकृतिर्नूतन एष सर्गः॥एषां स्थायिभावानाह॥रतिर्हासश्च
शोकश्च क्रोधोत्साहौ भयं तथा॥जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकी
र्तिताः॥स्पष्टं॥व्यभिचारिणो ब्रूते॥निर्वेदग्लानिशंकाख्यास्तथासूया मद
श्रमाः॥आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः॥व्रीडा चपलता ह ॥१९॥
र्ष आवेगो जडता तथा॥गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥सुप्तं

विबोधोमर्षश्चाप्यवहित्थमथोग्रता॥मतिर्व्याधिस्तथोन्मादस्तथामरण
मेवच॥त्रासश्चैववितर्कश्चविज्ञेयाव्यभिचारिणः॥त्रयस्त्रिंशदमीभावाः
समाख्यातास्तुनामतः॥निर्वेदस्यामंगलप्रायस्यप्रथममनुपादेयत्वेप्युपाद
नंव्यभिचारित्वेस्थायिताभिधानार्थं॥तेननिर्वेदस्थायिकःशांतोस्तिन
वमोरसः॥यथा॥अहौवाहारेवाकुसुमशयनेवादृषदिवामणौवालोष्टेवाब
लवतिरिपौवासुहृदिवा॥तृणेवास्त्रैणेवाममसमदृशोयांतुदिवसाःक्वचि
त्पुण्यारण्येशिवशिवशिवेतिप्रलपतः॥रतिर्देवादिविषयाव्यभिचारीतथांजितः॥
भावःप्रोक्तः॥आदिशब्दान्मुनिगुरुनृपपुत्रादिविषयाकांतादिविषयातुव्य
क्ताःशृंगारः॥उदाहरणं॥कंठकोणविनिविष्टमीशतेकालकूटमपिमेम
हामृतं॥अप्युपात्तममृतंभवद्वपुर्भेदवृत्तियदिमेनरोचते॥हरत्यघंसंप्रति

भाव १

घोग्यतां २ २ री

हन्तुरेष्यतः प्रभुमेस्य पूर्वाचरितैः शुभैः शुभैः कृतं॥ शूर्पणखां भवदीयदर्शनं व्य

नक्ति कालत्रितयेपि॥ एह्येहि वत्स रघुनंदन पूर्णचंद्र चुंबामि मूर्धनि चिरा

य परिष्वजे त्वां॥ आरोप्य वा हृदि दिवानिशमुद्वहामि वंदेथवा चरणपुष्कर क

द्वयं ते॥ एवमन्यदप्युदाहार्यं॥ ज्ञानेकोपपराङ्मुखी प्रियतमास्वप्नेद्य दृष्टा म

या मा मा संस्पृश पाणिनेति रुदती गंतुं प्रवृत्ता पुरः। नो यावत्परिरभ्य चा

टुकशतैराश्वासयामि प्रियां भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृ

तः॥ अत्र विधिं प्रत्यसूया। तदाभासा अनौचित्यप्रवर्तिताः॥ तदाभासा रसा

भासा भावाभासाश्च॥ तत्र रसाभासो यथा॥ स्तनमः केवमाक्षिप्य क्षणमवि वि ॥२०॥

नायं नरमसेविलेखकः आणानृणाम खमुखवयं मगसतो सुलने केशा

तः शशिमुखि समामालिंगसि बलात्तपः श्रीः कुसेषामदननगरि ध्यायसि

तुयं॥अत्रानेककामुकविषयमभिलाषंस्त्र्मइस्यनुचितंवकुव्यापारोपाप
नंव्यनक्ति॥भावाभासोयथा॥राकासुधाकरमुखीतरलायताक्षीसास्मेरयौ
वनतरंगितविभ्रमास्या॥तत्किंकरोमिकथमत्रतनोमिमैत्रींतत्स्वीकृतिव्या
तिकरेकइवाभ्युपायः॥अत्राचिंतानौचित्यप्रवर्तिता॥एवमन्येप्युदाहार्याः॥
भावस्यशांतिरुदयःसंधिःशबलतातथा॥क्रमेणोदाहरणं॥तस्याःसांद्रवि
लेपनस्तनतटप्रश्लेषमुद्रांकितंकिंवक्षश्चरणानतिव्यतिकरव्याजेनगोप्या
यते॥इत्युक्तेक्वतदित्युदीर्यसहसातत्संप्रमार्ष्टुंमयासाश्लिष्टारभसेनतत्सु
खवशात्तन्व्यापितद्विस्मृतं॥अत्रकोपस्यापरकस्मिन्शायनेविपक्षरमणीना
मग्रहेमुग्धयासद्यःकोपपराङ्मुखग्लपितयाचाटूनिकुर्वन्नपि॥आवेगाद
वधीरितःप्रियतमस्तूष्णींस्थितस्तत्क्षणंमाभूत्सुप्तइवेत्यमंदवलितग्री

वैपुनर्वीक्षितः ॥ अत्रौत्सुक्यस्योत्सिक्तस्य तपः पराक्रमनिधेरभ्यागमादेक
तः सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः ॥ वैदेहीपरिरम्भ एष च मुहु
श्चैतन्यमामीलयन्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥ अत्रा
वेगहर्षयोः ॥ क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा दोषाणां प्रश
माय नः श्रुतमहो कोपेऽपि कान्तं मुखं ॥ किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि
सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥ अत्र वितर्कौत्सु
क्यमतिस्मृतिशङ्कादैन्यधृतिचिन्तानां ॥ भावस्थितिस्तत्त्वत उदाहृता च ॥ मुख्ये र
सेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ॥ ते भावशान्त्यादयः ॥ अङ्गित्वं राजानुगतविवाह ॥२१॥
प्रवृत्तभृत्यवत् ॥ अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥ शब्दार्थोभय
शक्त्युत्थस्त्रिधा स कथितो ध्वनिः ॥ शब्दशक्तिमूलानुरणनरूपार्थशक्तिमूला

नुरणनरूपेभयशक्तिमूलानुरणनरूपव्यंग्य इति त्रिविधः ॥ अलंकारोऽथ व
स्त्वेव शब्दार्थावभासते ॥ प्रधानत्वेन संज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥ वस्त्वेवेति ॥
अनलंकृतं वस्तुमात्रं ॥ आद्यो यथा ॥ उल्लासस्य कालकूरवालमहांबुवाहं देवेन
येन कारठोर्जितगर्जितेन ॥ निर्वापितः सकल एव रणे रिपूणां धारा जलैस्त्रिज
गति ज्वलितः प्रतापः ॥ अत्र वाक्यस्यासंबद्धार्थत्वं मा प्रसांक्षीदिति प्राकरणि
काप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्युपमालंकारो व्यंग्यः ॥ ति
ग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः ॥ मतिमानतत्त्ववृत्तिः प्रतिपक्षाग्र
णीर्विभातिभवान् ॥ अत्रैवैकस्य द्विपदत्वे विरोधाभासः ॥ अमितः समितः प्राप्तै
रुत्कर्षैर्हर्षदः प्रभो ॥ अहितः सहितः साधुयशोभिरसतामसि ॥ अत्रापि विरो
धाभासः ॥ निरुपादानसंभारमभित्तावेव तन्वते ॥ जगच्चित्रं नमस्तस्मै कला

रुणाघ्वायथह्लिने ॥ अत्र व्यतिरेकः ॥ अलंकार्यस्यापि ब्राह्मणश्रमणन्यायेना
लंकारता ॥ वस्तुमात्रं यथा ॥ पंथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे । उ
ण्णअपओहरं पेक्खिऊण जइ वससि ता वससु ॥ अत्र यद्युपभोगक्षमोऽसि तदा
स्स्व इति व्यज्यते ॥ शनिरशनिश्च तमुच्चैर्निहंति कुप्यसि नरेन्द्र यस्मै त्वं । यस्मिन् प्रसी
दसि पुनः स भात्युदारोऽनुदारश्च ॥ अत्र विरुद्धावपि त्वदनुवर्त्तनमेकं कार्यं कुरु
त इति ध्वन्यते ॥ अर्थशक्त्युद्भवोऽप्यर्थो व्यंजकः संभवी स्वतः ॥ प्रौढोक्तिमात्रा
न्निष्पन्नो वा कवेस्तेनोंभितस्य वा ॥ वस्तु वालंकृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ॥
वस्त्वलंकारमथवा तेनायं द्वादशात्मकः ॥ स्वतःसंभवी इदं प्रथमकल्पितं श्रे
ति द्विविधोऽर्थः ॥ स्वतःसंभवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचि
त्येन संभाव्यमानः ॥ कविनाप्रौढोक्तिमात्रेण बहिरसन्नपि निर्मितः कविनिब

॥२२॥

अलससिरोमणि धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमयओ। इति भणितेन
नतांगी प्रफुल्लविलोचना जाता।

क्तेन वक्रेति द्विविधोपर इति त्रिविधः॥ वस्तु वालंकारो वेति षोढा व्यंग्यकः तस्य व
स्तु वालंकारो वा व्यंग्य इति द्वादशभेदोर्थशक्त्युद्भवो ध्वनिः॥ क्रमेणोदाहरणानि॥
अलससिरमणिधुत्ताणं अग्गिमो पुत्तिधणसमिद्धिमओ। इइ भणिएण णअंगी
पफुल्लविलोअणा जाआ॥ अत्र ममैवोपभोग्य इति वस्तुना वस्तु व्यज्यते॥ ध
न्यासि या कथमसि प्रियसंगमेपि विस्रब्धचाटुकशतानि रतान्तरेषु॥ नीवीं प्र
ति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि॥ अत्राहं ध
न्यातमा धन्येति व्यतिरेकः॥ दर्पान्धगन्धगजकुम्भकपाटकूटसंक्रान्तिनिघ्नघनशोणित
शोणशोचिर्वीरैर्विलोक्य युधि कोपकषायकान्तिः कालीकटाक्ष इव यस्य करे कृपा
णः॥ अत्रोपमालंकारेण सकलरिपुबलक्षयः क्षणात्करिष्यत इति वस्तु व्यज्य
ते॥ गाढकांतदशनक्षतव्यथासंकटादरिवधूजनस्य यः॥ ओष्ठविद्रुमदलान्य
मोचयन्निर्दशन् युधि रुषा निजाधरं॥ अत्र विरोधालंकारेण धरनिर्द शन

समकालमेवयत्रवोध्यापादितातुल्ययोगिता।ममक्षस्याप्यन्यस्यक्षति
र्निवर्तिता।मितद्युन्द्रुरूढोक्ष्यतइसकेयेक्षाचा।एकदाहरणेपुरस्वतःसंभवीयंउव
कैलासस्यप्रथमशिखरेवेणुसंमर्छनाभिःश्रुत्वाकीर्तिंविबुधरमणीगीय
मानांयदीयां॥स्रस्तापांगाःसरसबिसिनीकांडसंजातशंकादिङ्नागाःश्रव
णपुलिनेहस्तमावर्त्तयंति।।अत्रवस्तुनायषामप्यर्थाधिगमोनास्तितेषामपे
वमादिक्षुद्रजनेनचमत्कारंकरोतित्वत्कीर्तिरितिवस्तुव्यज्यते।केसेसुव
लामाडिंअतेनअसमरम्मिडअसिरीगहिआ।जहकुंदराहिंविउराअस्यसम
दठकंठअमिसंठविआ।।अत्रकेशग्रहणेणवलोकनोद्दीपितमदनाइवकुंदरा
स्ताद्विधुरान्कंठेगृहीतीयुरयेक्षा।एकत्रसंग्रामेविजयदर्शनात्तस्यारयःप
लाय्यगुहासुतिष्ठंतीतिकाव्यलिंगं।नपलाय्यगतास्ताद्वैरिणःअपितुततःप ॥२३॥
रामर्षसंस्तावयतान्कुंदरान्नयतीतिझातपकृतिर्वागादालिंगनरसोद्योते

दयितेनलघुस्मयसरति। मनस्विनीनां मानः पीडुनभीत इव हृदयात्। अत्रो
त्प्रेक्षयाप्रसालिंगनंतत्रविडंबितमिति वस्तुध्वनिः॥ ठाठरं वहसंती कइवअ
णं कुरुह बद्धविणिवेसा। दावेइ भुवनमंडलमण्णं विअ जइसा वाणी। अत्रोत्प्रेक्ष
याचमत्कारैककारणेन वंध्यवंदागदजलज्जासनस्थानिर्मिमीत इति व्य
तिरेकः॥ एषु कविप्रौढोक्तिमात्रनिष्पन्नः॥ डोलंका गिरिमेहलाहिं खलिआ
संभोअरिचन्नोरइफारफुल्लफणावलीकवलनेपत्तादरिन्नणं। मेएहिं मल
आनिलाविरहिणीणीसाससंपक्किणोडाअदाझतिसिसुत्तणेगविवहला
तारुण्णपूछाविअ॥ अत्रानिश्वासैः आधिक्येन्धर्याः किं किं न कुर्वंत इति वस्तुव्य
ञ्जपते॥ सहिविरइअमाएस्समङ्गधीरत्तणेण आसासं। प्रियदंसनविह
लंगवणम्मिसहसंतितेणओसरिअं। अत्र वस्तुनाअलंकृतापि प्राधनेडास

ते५

नेति विज्ञावना॥ प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढुं न शक्यत इ
त्युत्प्रेक्षा च॥ आर्द्रार्द्रकरजारदनक्षतैस्ते वल्लोचनयोर्मम दत्तः॥ रक्तांशु
कं प्रसादः कोपेन पुनरिमे नाक्रांतो॥ अत्र किमिति लोचने कुपिते वहसीत्यु
त्तरालंकारेण न केवलमार्द्रनखक्षतानि गोपयसि यावत्तेषामहं प्रसा
दपात्रं जातेति वस्तु॥ महिलासहस्सभरिए तुह हिअए सुहअ सा अमा
अंती॥ दिअहं अणण्णकम्मा अंगं तणुअं पि तणुएई॥ अत्र हेत्वलंकारेण त
नोस्तनूकरणे पि तव हृदये पि सा न वर्तत इति विशेषोक्तिः॥ एषु कविनि
बद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नः॥ एवं द्वादश भेदाः॥ शब्दार्थोभयभूरेकः॥ ॥२४॥
यथा॥ अतंद्रचंद्राभरणा समुद्दीपितमन्मथा॥ तारकातरला श्यामा सानं
दं न करोति कं॥ भेदा अष्टादशास्य तत्॥ अस्येति ध्वनेः॥ ननु रसादीनामनं

२५

तदेवं कथमष्टादशोऽयं तत्राह। रसादीनामनन्तत्वाद्भेदरको हि गण्यते। अनं
तत्वादिति तथाहि नव रसाः। शृंगारस्य द्वौ भेदौ संभोगो विप्रलंभश्च। तत्र संभोग
स्यापि परस्परदर्शनालिंगनचुंबनादिकुसुमोच्चयजलकेलिसूर्यास्तमयचं
द्रोदयषड्ऋतुवर्णनादयो बहवो भेदाः। विप्रलंभस्याभिलाषादय उक्ताः। तयो
रपि विभावव्यभिचारिवैचित्र्यं तत्रापि नायकप्रतिनायकयोरुत्तममध्यमाध
मप्रकृतित्वं तत्रापि देशकालावस्थाभेदा इत्येकस्यैव शृंगाररसस्यानंत्यं का
गणना सर्वेषां। असंलक्ष्यक्रमत्वं तु सामान्यमाश्रित्य रसादिध्वनिरेक एव ग
ण्यते। वाक्यस्थः पदस्थः शब्दार्थोभयशक्तिमूलः। पदेष्वन्येऽपि शब्दाद्वाक्ये
ष्वेकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यंग्येन वाक्यव्यंग्यापि भार
तीभासते। तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणं। यस्य मित्राणि शत्रवस्तथा। अ

२५

नुकंपोनुकंप्यस्थस्य ज्ञातः सचजीवति अत्र द्वितीयमित्रादिशब्दा आश्वस्तच
निर्यत्र एत्थ स्नेहपात्रत्वाद्यर्थी संक्रमितवाच्याः॥ खलववहारा दीसंति दारुणाउ
हविन्नह विधीराणं। हिअअवअस्सबहुमआ णहु ववसाआ विमुहंति। अत्र विमु
हंतीति। लावण्यं तदसौ कांतिस्तद्रूपं सवचः क्रमः॥ तदासुधास्पदमभूदधुनातु
ज्वरो महान्॥ अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यंते। यथावामुग्धे मु
ग्धतयैव नेतुमखिलः कालः किमारभ्यते मानं धत्स्व धृतिं बधान [illegible] तां दूरीकुरु प्रे ऋजु४
यसि॥ सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना नीचैः शंस हृदिस्थितो हि
ननुमे प्राणेश्वरः श्रोष्यति॥ अत्र भीताननेत्यनेन नीचैः शंसनस्य युक्तता गम्यते। भावा ॥२५॥
दीनां पदप्रकाश्यत्वेनाधिकं वैचित्र्यमिति न तदुदाह्रियते। रुधिरविसरप्रसाधित
करालकरवालरुचिरभुजपरिघः॥ झटितिभ्रुकुटीविटंकितललाटपट्टो विभाति

न पभीमः॥ अत्र भीषणी यस्य नीमसेन उपमानं॥ भुक्तिमुक्तिफलदे कांतसमा
देशानतक्षरा॥ कस्य नाने दनिस्यंदं विदधाति सदागमः॥ काचित्सहसंकेतदायिन
मेवं सुखयायावयाडं सालि॥ स्नायं स्नानमुपासितं मलयडोंगनोंसमालेपितं या
तोस्ताचलमोलिमं बरमाणि विस्रब्धमंदागतिः॥ आश्चर्यं तवसौकुमार्यमभि
तः क्लांतासि येनाधुनाने त्रद्वंद्वममीलनव्यातिकरं शक्नोति ते नासितुं॥ अत्र व
क्तुनाकृतपरपुरुषपरिचयास्नातासीति वस्तु। अधुनापदद्योत्यं व्यज्यते॥
तदप्राप्तिमहादुःखविलीनाशेषपातका॥ तच्चिंताविपुलाह्लादक्षीणपुण्यच
यास्वती॥ चिंतयंती जगत्सूतिं परब्रह्मस्वरूपिणं निरुच्छ्वासतया मुक्तिं गता
न्या गोपकन्यका॥ युग्मं॥ अत्र जन्मसहस्रैरुपभोग्यानि दुःकृतसुकृतफला
नि वियोगदुःखचिंताह्लादाभ्यामनुभूतानीत्युक्तं॥ एवं चाशेषचयपदद्यो
त्येऽतिशयोक्ती॥ क्षणदा व क्षणदा वनमभवनं व्यसनमव्यसनं॥ तवैव वीरत

या।

वद्विषतां पराङ्मुखेत्वयि पराङ्मुखं सर्वं ॥ अत्र शब्दशक्तिमूलविरोधाभासेनार्थां
तरन्यासेन विधिरपि त्वामनुवर्तत इति सर्वपदद्योत्यं वस्तु ॥ तुह बलाहस्स गोत्त
सम्मि अहरो मिलाणकमलदलो ॥ इअ एव वहुआ सुणइ कुणइव अएंस हीस
मुद्दं ॥ अत्ररूपके एत्वयास्य मुहुः परिचुंबलं ह्लतयेन म्लानत्वमिति मिलाणा
दिपदद्योत्यं काव्यलिंगं ॥ एवं कुस्चतःसंजीवीयं उक्तः ॥ राईसुचंदधवलासु ललि
अमफालिअउएंडोडावं ॥ एकछत्तं बकुणइतिफुअएरज्जं विअं तत्तो ॥ अत्र
वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कश्चिदपि तदादेशपराङ्मुख इति
जायद्भिरूपभोगपरैर्निशाति वाह्यते इति तु न राज्यपदद्योत्यं वस्तु जकाश्य
तो ॥ निशितशरधियार्पयति स्मरं नंगो दृशि सुदृशः स्वबलं वयस्येराले ॥ दिशिनि
यति यत्र सा च तत्र व्यतिकरमेयसमुन्मिषं त्यवस्थाः ॥ अत्र वस्तुना युगपदव
स्थापरस्परविरुद्धा अपिभवंतीति व्यतिरेकपदद्योत्यो विरोधः ॥ वाखिन्नं तोवि

२४
॥२६॥

घुणेणेसंदावकदत्थिएण हिअएण ॥ धण्णव्व अस्सरएणेव विसुक्कडाइं एण चलइ से
हारो ॥ अत्र विशुष्कड्डातित्वलक्षणे हेतुलंकारेण हारोनवरतं कंपमान एवास्ताइ
न चलति पदद्वयोत्थं वस्तु ॥ सो मुद्धसामलंगो धम्मिल्लो कलिअललिअणिअदेहो ॥
तीए खंधाहि वलंगहिअसरो रससंगरे डअइ ॥ अत्र रूपकेण सुकुराकर्षणेन केश
पाशः स्कंधयोस्तथाशास्त्रावपारतिविरतावप्यनिवृत्ताभिलाषः कामुकोस्मदि
ति स्कंधपदद्वयोत्था विभावना ॥ एक्कुक्कविसेसेढोक्किमात्रनिष्पन्नशरीरः ॥ णावपुणि
मामिअं कुसुमसुअहक्केत्तं सिभएणसुमहल्लपच्चं ॥ कासोहगामसमगा पउस्सरअणी
वतुहअल्ल ॥ अत्र वस्तुनामयीयानास्यामपि प्रथममनुरक्तं केवनततइति एवेसा
दिपउस्सत्यादिपदद्वयोत्थं वस्तु व्यज्यते ॥ सहिएण वाणिकुवणस्समरम्भिअं कपा
लीसहिएणी विडाए हारो णिवारिउ विअउब्बेरत्तो नदोक्कहं रमिअं ॥ अत्र वस्तु

नाहारच्छेदादनंतरमन्यदेवरतमवश्यममुत्तत्कथयकीदृगितिव्यतिरेकः॥ हंपदग
म्यः॥ पविसंती घरवारं विवलिअवअणा विलोईऊणपहं॥ खंधे घेत्तूणघडंहाहाए
ट्ठो त्तिरूअसिसहिकिंत्ति॥ अत्रहेत्वलंकारेणसंकेतनिकेतंगच्छंतं दयितं दृष्ट्वायदि
तत्रगंतुमिच्छसितदापरं घटंगृहीत्वागच्छेतिवस्तुकिंतिपदव्यंग्यं॥ यथा वा॥ विहलं
खलंतुमंसहिदठ्ठुणकुडेनतरलतरदिठ्ठिं॥ वाप्फंसमिसेणअप्पागुरूओत्तिपाडि
अविभिण्णो॥ अत्रनदीकूलेलतागहनेकृतसंकेतमप्राप्तंगृहप्रवेशावसरेपश्चा
त्तगंतं दृष्ट्वापुनर्नदीगमनायद्वारघातव्याजेनबुद्धिपूर्वव्याकुलयात्वयाघटःस्फो
टितइतितत्किमितिनाश्वासितत्समीहासिद्ध्येव्रजंतं अहंश्वश्र्वानिकटेसर्वंसम
र्थयिष्येइतिद्वारस्पर्शव्याजेनेत्यपकृत्यावस्त्वंजोकाईमफुरसेनअविहूएता
रूणउसुअमणएसा॥ बुद्धाविनबोढव्वपरवकुअहरइतुहहिअअं॥ अत्रकाव्य
लिंगेनास्मानुज्झित्वावृद्धांपरवधूमभिलषसीतित्वदीयमाचरितंवक्तुंन

॥२७॥

शक्यमित्याक्षेपः॥एवंपदप्रकाश्यः॥एतदुक्तंविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्प
न्नशरीरः॥वाक्यप्रकाश्येपत्तुपूर्वमुदाहृतं॥शब्दार्थोभयशक्त्युद्भवस्तुपदप्रका
श्योनभवतीत्येवंपंचत्रिंशद्भेदाः॥प्रबंधेप्यर्थशक्तिभूः॥यथागृध्रगोमायुसंवा
देअलंस्थित्वाश्मशानेस्मिन्गृध्रगोमायुसंकुलेकंकालबहुलेघोरेसर्वप्राणिभ
यंकरे।नचेहजीवितःकश्चित्कालधर्ममुपागतः।प्रियोवायदिवाद्वेष्यप्राणिनांग
तिरीदृशी॥इतिदिवाप्रभवतोगृध्रस्यपुरुषविसर्जनपरमिदंवचनं।आदि
त्योयंस्थितोमूढाःस्नेहंकुरुतसांप्रतं।बहुविघ्नोमुहूर्त्तोयंजीवेदपिकदाचन॥
अमुंकनकवर्णाभंबालमप्राप्तयौवनं॥गृध्रवाक्यात्कथंमूढास्त्यक्षध्वम
विशंकिताः॥इतिनिशिविजृंभमाणस्यगोमायोर्जनविसर्जनपरंचेतिप्रबं
धएवप्रथते।अन्येत्वेकादशभेदाग्रंथविस्तरभयान्नोदाहृताः॥स्वयंलक्ष्य

णतोनुसर्त्तव्याः॥अपिशब्दात्तद्वाक्ययोः॥पदैकदेशरचनावर्णेष्वपि रसादयः॥
तत्र प्रकृत्या यथा॥रईकेलिहिअणिअसनकरकिसलअरुद्धणअणजुअलस्स
॥रुद्दस्स तईअणअणं पव्वइपरिचुंबिअं जअइ॥अत्र जयतीनतुशोभत इत्या
दिसमानेपिस्थगनव्यापारे लोकोत्तरेणैव रूपेणास्यापिधानमिति तद्वो
त्कृष्टं।ज्ञेयान्सायमुपाकृतः सत्रापथं पादानतः क्रांतया द्विन्नाण्येव पदानि
वासवनाद्यावन्नयात्यन्मनाः।तावद्यस्कृतपाणिसंपुटलसन्नीवीनि
बंधेध्यतोधावितैवहृतप्रणामकमहोप्रेम्णोविचित्रागतिः॥अत्रपदानीति॥न
तुद्दाराणीति तिङ्सुपोर्यथा॥पथिस्तुकुंचंचूचारुराभांकुराणां दिक्षुपवमानो
वीरुधांलासकश्च॥नरिनर्त्ति किरति द्राक्सायकं पुष्पधन्वा पुरि पुरि विनिव
त्तामानिनीमानचर्चा॥अत्र किरतीति क्रिरणस्य साध्यमानत्वं निवर्त्तेतिमि

२८

पथिषु

दिशि३ ॥२८॥

वर्त्तनस्य सिद्धत्वं तिङस्तु पाच ॥ तत्रापि नृ भवत्यये नानीतं त्वं द्यो[illegible]ते ॥ यथा वा ॥ लि
खन्नास्ते भूमिं बहिः खनन्तः प्राणदयिनो निराहाराः सरुषः सततरुदितो च्छूनलय
नाः परित्यक्तसर्वव्[illegible]सिन पठितं पंजरशुके स्तवावस्थाचेयं विसृष्टजकठिनेमान
मधुना अत्र लिखन्निति न तु लिखतीति ॥ आसीनत्वासितनइति ॥ अपितु प्रसाद
पर्यं तमास्तइति ॥ भूमिमिति न तु भूमाविति ॥ न तु बुद्धिपूर्वकं किंचिल्लिखतीति ति
ङ् स्तु प्र विभक्तीनां व्यंग्यं ॥ संबंधस्य यथा गामारुह्य ग्राममेव सेमिनी णाअरंहि
इंग आरणामि ॥ णाअरि आणंय इणो हरेमि जाहेमि साहेमि ॥ अत्र नागरि
कारणमिति [illegible] यथा ॥ रमणीयः क्षत्रियकुमार आसीदिति कालस्य एषा हि

शि१

भग्ने माहेश्वरे शैवे रै कार्मुकं दाशरथिं प्रकुपितस्य भार्गवस्योक्तिः ॥ वचनस्य यथा
तासां गुणग्रहणानां तासां मुक्तकंठानां न सप्रेमस्य तासां भालिङ्गानां सुंदर इति सं
ज्ञाज्ञवे मे सारणं ॥ तेषां गुणग्रहणानां तासां मुक्तकंठानां नस्य प्रेम्णः ॥ तेषां
भणितानां सुंदर ईदृशं ज्ञातमक्समानं अत्र गुणग्रहणादीनि वचनकृतं प्रेम्णः प्रेव
कत्वं शोत्यते पुरुषवचनस्य यथा ॥ रेरे वंकलोचनां विनतरु वेवेतः प्रभुप
स्थिर प्रेमाणां मद्भिमानमेवं नैनयनामालोका किं न्योतेन नत्वसि किंमन्येवि
हरिष्यसे वनदन्तां मुखां तरायामिमामे वा पंठनटे हन्तारवलु शिलासंसारवा
रान्निद्यो ॥ अत्र शुद्धासः पूर्वनिपातस्य यथा ॥ येषां दोर्बलमेव दुर्बल
नया ते सम्मतास्तैरपि प्रायः केकेवलनीतिरीतिकुशलैः कार्यं किमुर्वीभु

२१

१

रैः ॥ येस्माशाक्तो पुनः पराक्रमनयस्वीकारकौंतक्रमास्तेस्युवैविभवा

द्दशास्त्रिजगतिद्विजाः पविजापरं अ नयराक्रमस्यप्राधान्यंगम्यते वि

भक्तिविशेषस्ययथा ॥ पृघनाद्युनिधीरधनुद्युनिधीरधनुर्द्युनिद्युनिविद्युरै

रयोधितवदिवसं दिवसेनतुनरयमवानपुद्रविधिमिद्रसाटे धुवादयदा

अत्रदिवसेनेतिञ्चयवगैतनीयाफलप्राप्तिर्योतयति ॥ भूयोभूयः सवि

धनगरीरघ्ययाधर्पटंतेद्द्यद्वारद्ध्याभवनवलभीतुगवातायनस्था ॥ साह

न्कामंनवमिवरतिर्मालतीमाधवंयन्नोढोन्कांगैठाललितनुलिनेरं के

स्तान्यनीवेति ॥ अत्रानुकंप्रापले: कन्यपतद्दिनस्यपरिछेदानीतः सक

लवचनामविशयः पुनर्जन्मन्यस्मिन्ननुभवपथंयोनगतवान् विवे

ना१

कथं खं स्वादुपवितमहामोहगहनो विकारः कोप्यन्तर्जडयति च तापं च तनु
ते ॥ अत्र शक्त्याद्युपसर्गादेस्य ॥ हृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं
निहताश्च नो द्विषः न मां सितिष्ठसि त्रिदिवितावदं स्तुमान्त्रयावदाघान्तु
दयाद्रिमौलिते ॥ अत्र तुल्ययोगिताद्योतकस्य चेति निपातस्य रामोसौ
भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यविपर्ययाद्यदि परं
देवो न जानाति तं ॥ वेदांशुयशांसि गायति मरुत् हस्त्यैकवारणा इति शैलीभू
त विशाल तालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥ अत्रासावितिभुवनेष्विति
गुणैरिति सर्वनामवचनप्रातिपदिकानां न त्वदिति न मदिति अपि त्वस्म
दिति सर्वादिविपिबरणः ॥ भाग्यविपर्ययादिति अन्यथा संपत्तिमुखेन

30

त्वभावमुखेनाभिधानस्य। न हि तामि न ते कलयन्ति कल्ला मनुमदन चतुर्भुवो : पठ

नाये अधिवसकलनामौलिभियंच किन हरिणावलनयना अत्र इमनिः

व्ययोभाव कर्म त्वाधारा गांसं रूपस्य न हणल्वेड्डनिधनुषः समीपइति मौ

लौवसतीत्यादिभिस्तत्वतले तेषां वाचकत्वेनि करिवन्त्व रूपस्य विशेषाय

स्वमन्कार कारी स एव व्यंजकः॥ एवमन्येषामपि वाद्दव्यं : वर्ण रचनानां गु

णत्वरूपे व्यंजकत्व मुदाहरिष्यामि ते॥ अपिरा हान्मवधे षु नाटकादिषु एवं

रसादीनां पूर्वगणित नमेदानां ममहापद्धे दाः॥ मेदास्तदेकपंचाशत्त व्याख्या

ताः॥ तेषांवान्योन्ययोजनं संकरेण त्रिरूपेण संसृष्ट्यावेकरूपया न के

वलं शुद्धा एवैकपंचव्याख्याताः तेषांवान्योन्ययोजनं संकीरेणत्रिरूपे,

णसंसृष्टो) चाप्राधान्येन भवन्तीयाश्चैतेषां चैषां प्रभेदैकपंचाशत्ता । संशयास्पदत्वे
नानुग्राह्यानुग्राहकतया एकव्यंजकानुप्रवेशेन त्रिविधेन संकरेण परस्प
रनिरपेक्षरूपतयैकप्रकारया संसृष्ट्या चेति चतुर्गुणने ॥ वेदखाब्धिवियच्चन्द्राः
31
१०४०४ शुद्धभेदैः सह शरेषुयुगखेन्दवः १०४५५ ननु दिग्मात्रमुदाहि
यते शरणपादद्युतिप्रादेवरज्ञाश्चाप स्तुतश्च किंचिदभिलिख्यताद्युपल्लोद्
रवल्लद्वी चरम्मि च्चन्तलिङ्गुवरोइः इणप्राधुनिकादेव रज्ञायया स्तुम
गाकिमपि नभणिता रोदिति परवाहृद्बलभी गेह च्चन्तनीय तो वराकीः
च्चचानुनयः किमपि मोगलतुणेर्थोन्तरे संक्रमितः किमनुरणन्यायेनो
पभोग एव व्यंग्ये व्यंजक इति संदेहः ॥ स्निग्धश्यामलकान्तिलिप्तवियतो

३१

वेल्लद्बलाका घनावाता: शीकरिण: पयोदसुहृदामानन्दकेकाकरा: ॥
यो कामं संतु दृढं कठोरहृदयोरामोस्मिसर्वंसहेवैदेहीतु कथंभविष्यतिहृ
हाहादेविधीनाभव ॥ अत्रलिप्तेतिपयोदसुहृदामितिवान्यत्रनिराकृतत्वा
च्यया: संसृष्टि: नान्यासदृशारामोस्मीत्यर्थान्तरसंक्रमितवाच्ययो: सं
कर: एवमन्यमप्युदाहार्यं ॥ ॥ ॥ इतिकाव्यप्रकाशिकायांध्वनि
निर्णयनवचतुर्थउल्लास: ॥ ॥ ॥

रवं धनौ ध्वनि गीते गुणीभूत व्यंग्य [illegible] स्य प्रभेदानाह॥ अगूढम परस्यांगं वाच्यसिद्ध्यंगमस्फु
टं॥ संदिग्ध तुल्य प्राधान्ये काक्वाक्षिप्तमसुंदरम्॥ व्यंग्यमेवं गुणीभूत व्यंग्यस्याष्टौ भिदाः
स्मृताः॥ कामिनी कुच कलश वद्गूढं चमत्करोति॥ अगूढं तु स्फुटतया वाच्यायमानमिति गु
णीभूतमेव॥ अगूढं यथा॥ यस्यासुहृत्कृत तिरस्कृति रेत्य तप्तसूची व्यधव्यतिकरेण युनक्ति कर्णौ॥ कांचीगुणग्रथन भाजनमेष सो [illegible] जीवन्न्यस्त प्रतिभवामि किमावहामि॥ अ
जीवन्नित्यर्थांतर संक्रमित वाच्यस्य॥ उन्निद्र कोकनद रेणु पिशंगितांगा गायंति मंजु मधु
पा गृह दीर्घिकासु॥ एतच्चकास्ति च रवेर्नव बंधु जीव पुष्पच्छ [illegible] भमुदयाचल चुंबि बिंबं॥
अत्र चुंबनस्यात्यंततिरस्कृत वाच्यस्य॥ अत्रासी त्फणि [illegible] बंधन विधिः शक्त्या भवद्दे
वरे गाढं वक्षसि ताडिते हनुमता द्रोणाद्रि र [illegible] हृतः दिव्यैरिंद्र दिदत्र लक्ष्मण शरैर्लोकांत
रं प्रापितः केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कंठाटवी अत्र केनाप्यत्रेति अर्थशक्तिमू
लानुरणनस्य तस्याप्यत्रेति युक्तः पाठः॥ अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्यांगं
रसादि अनुरणनरूपं वा [illegible] यं स रसनोत्कर्षी पीनस्तन विमर्दनः॥ नाभ्यूरु जघनस्पर्शी
अ

नीवीविस्रंसनः करः॥ अत्र शृंगारः करुणस्य॥ कैलासालयभाललोचनरुचा निर्वर्त्तितालक्तक क्र।
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम्॥ स्पर्द्धाबंधसमृद्धयेव सुदृढं रूढं यया ने
त्रयोः कान्तिः कोकनदानुकारसरसा सद्यः समुत्सार्यते॥ अत्र भावस्य रसः॥ अस्फुटाः परितः स्फु
रन्ति गिरयः क्रूरास्तथाम्भोधयस्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः॥ आश्चर्ये
ण स्तुवतु मुकुः स्फूर्तिमिति प्रस्तौमि यावत्कुवस्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रि
ताः॥ अत्र भूविषयारत्याश्चोभावाराजविषयस्य रतिभावस्य॥ बंदीकृत्य नृप द्विषां मृगदृ
शस्ताः पश्यतां प्रेयसां श्लिष्यन्ति प्रणमन्ति भान्ति परितश्चुम्बन्ति ते सैनिकाः॥ अस्माकं सुकृ
तैर्दृशोर्निपतितोस्योचितश्चाराणि धेहि विधास्तान्विपक्षाखिलास्तादिति तैः प्रत्यर्थिभिः स्तूय
से॥ अत्र भावस्य रसाभासभावाभासौ प्रथमद्वितीयार्धयोर्यौ॥ अविरलकरवालकंपनै
र्भ्रुकुटीतर्जनगर्जनैर्मुहुः॥ ददृशे तव वैरिणां मदः सगतः क्वापि तवेक्षणे क्षणात्॥ अत्र भा
वोपशमः॥ साकं कुरंगकदृशा मधुपानलीलां कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते॥ अन्याभिधा
यितवनाम विभोगृहीते केनापि तत्र विषमा मधुरो दवस्थः॥ अत्र त्रासस्योदयः॥ असोढत

सा २ रू४

६

त्कालोल्लसदसहभावस्य तपसः कथानां विस्रम्भेष्वपि च रसिकः शैलदुहितुः॥ प्रमोदं वो दि-
श्यात्कपटबटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः॥ अत्रावेगधैर्ययोः
संधिः॥ पश्येत्कश्चिच्चल चपल रे का त्वराहं कुमारी हस्तालम्बं वितर हहहा व्युत्क्रमः कासि यासि।
इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः कन्या कंचित्फलकिसलयान्याददानाभिधत्ते॥ अ-
रामोदप्रमोदितदिशस्ततः। आययुर्भृंगमुखराःशिरःशेखरशालिनः। अत्रकर्ण
श्रवणशिरःशब्दाःसन्निधानप्रतीत्यर्थाः। विदीर्णाभिमुखारातिकराले संगरांतरे
। धनुर्ज्याकिणचिह्नेनदोष्णाविस्फुरितं तव। अत्रधनुःशब्दआरूढत्वावगतये। अ
न्यत्रतुज्याबंधनिष्पंदभुजेनयस्या[illegible]सा विनिश्वसद्वक्त्रपरंपरेण। कारागृहेनिर्जित
वासवेनलंकेश्वरेणोषितमाप्रसादात्। इतिकेवलोज्याशब्दः। ज्याणोध्वरपरिघं
गविभ्रमप्रतिपत्तिभिः। मुक्ताहारेणलसताहसतीवस्तनद्वयं। अत्रमुक्तानामन्य
रत्नमिश्रितत्वबोधनायमुक्ताशब्दः। सौंदर्यसंपत्तारुण्यंयस्यास्तेतेचविभ्रमाःप
घदाछुष्पमालेवकिन्नाकर्षतिसासखे। अत्रोत्कृष्टपुष्पधिये पुष्पशब्दःनिरूपप
दोहिमालाशब्दः पुष्पस्रजमेवाभिधत्ते। स्थितेषेतत्समर्थनं। नखलुकर्णावतंसादि

वक्त्र घनकाचित्यादिक्रियते ऽनगाद मधुरां वाचं विशदाक्षरशालिनीमित्यादौ क्रियाविशेष
णत्वेपि विवक्षितार्थप्रतीतिसिद्धौ गतार्थस्यापि विशेष्यस्य विशेषणदानार्थं पुनः प्रयो
गः कार्य इति न युक्तं युक्तं। युक्तत्वे वा। चरणत्रपरित्राणरहिताभ्यामपि द्रुतं।। पादाभ्यां दूर
मध्वानं व्रजन्नेष न खिद्यते इत्यत्राहार्यं॥ ख्यातेऽर्थे निर्हेतोऽदुष्टता। यथा। चंद्रं गता पद्मगु
णान्न भुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां। उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्री
तिमवाप लक्ष्मीः॥ अत्र रात्रौ पद्मस्य संकोचो दिवा चंद्रमसश्च निष्प्रभत्वं लोकप्रसि
द्धमिति न भुंक्ते इति हेतुं नापेक्षते। अनुकरणे तु सर्वेषां। सर्वेषां श्रुतिकटुप्रभृतीनां दोषा
णां। यथा। मृगचक्षुषमद्राक्षमित्यादि कथयत्ययं। पश्यैष च गवित्याह सुत्रामाणं यजे
ति च॥ वक्त्राद्यौचित्यवशाद्दोषोपि गुणः क्वचित्क्वचिन्नोभौ। वक्तृप्रतिपाद्यव्यंग्यवाच्यप्र
करणादीनां महिम्ना दोषोपि क्वचिद्गुणः। क्वचिन्न दोषो न गुणः। तत्र वैयाकरणादौ व
क्तरि प्रतिपाद्ये वा रौद्रादौ च रसे व्यंग्ये कष्टत्वं गुणः क्रमेणोदाहरणानि। दीधीङ्वेवीङ्
समः कश्चिद्गुणवृद्ध्योरभाजनं। क्विप्प्रत्ययनिभः कश्चिद्यत्र संनिहिते न ते। यदा त्वाम
हमद्राक्षं पदविद्याविशारदं॥ उपाध्यायं तदास्मार्षं समस्प्राक्षं च संमदं॥ अंत्रप्रोतबृह
त्कपालनलकक्रूरक्वणत्कंकणप्रायप्रेंखितभूरिभूषणरवैराघोषयंत्यंबरं॥ पी

तच्छर्दितस्तत्क्वदुमघनगाघार घोरोल्लसद्यालोलक्तानतार भैरववपुर्दर्पोद्धतं धाव
ति॥ वाच्यवशाद्यथा। मातंगाः किमु वल्गितैः किमफलैराडंबरैर्जंबुकाः सारंगा
महिषा मदं व्रजत किं शून्येषु शूरा न के। कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुनः
सिंधुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जितं॥ असिद्धे वाच्ये परुषाः शब्दाः प्रकरण
वशाद्यथा। रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं नो दृष्टेति मुधैव चालयसि
किं वाताभिधूतं शिरः। उत्कंठाघटमानषट्पदघटासंघट्टदष्टच्छदस्तत्पादाहतिमंत
रेण भवतः पुष्पोद्गमोयं कुतः॥ अत्र शिरोविधूननेन कुपितस्य वचसि। क्वचिन्नीरसे न
गुणो न दोषः। यथा। शीर्णघ्राणांघ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्दीर्घाघ्राता
नघौघैः पुनरपि घटयत्येक उल्लाघयन्यः। घर्मांशोस्तस्य वोंतर्द्विगुणघनघृणानिघ्ननिर्विघ्न
वृत्तेर्दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातं॥ अप्रयुक्तनिहतार्थौ श्लेषा
दौ न दुष्टौ। यथा। येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो यश्चोद्वृत्तभुजंगहा
रवलयो गंगां च योधारयत्॥ यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः पायात्स स्व
स्वयमंधककक्षयकरस्त्वां सर्वदो माधवः॥ अत्र माधवपक्षे शशिमद् इक्षपदं कक्षयशब्दा

वत्रयुक्तनिहतार्थौ । अस्त्रीलं क्वचित्गुणो यथा ॥ सुरतारंभगोष्ठ्यां तां कूलदानविधिना विस-
ज्ञे हृदयस्थां द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्त्विति कामशास्त्रस्थितौ । यथा । करिहस्तेसंबा
धे प्रविश्यांतर्विलोडिते । उपसर्पन्ध्वजः पुंसः साधनांतर्विराजते ॥ ग्राम्यकथासु । यथा । उत्ता
नोच्छूनमंडूकपाटितोदरसन्निभे । क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ॥ १ ॥ निर्वाण
वैरदहनाः प्रशमादरीणां नंदंतु पांडुतनयाः सह माधवेन ॥ रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्व
स्था भवंतु कुरुराजसुताः सभृत्याः ॥ १ ॥ अत्र भाव्यमंगलसूचकं । संदिग्धमपि वाच्यमहिम्ना क्व
चिन्नियतार्थप्रतिपत्तिकृत्त्वेन व्याजस्तुतिपर्यवसायित्वेन गुणः । पृथुकार्तस्वरपात्रं भूषि
तनिःशेषपरिजनं देव ॥ विलसत्करेणुगहनं संप्रति सममावयोः सदनं ॥ १ ॥ प्रतिपाद्यप्रति
पादकयोर्ज्ञत्वे सत्यप्रतीतं गुणः । यथा । आत्मारामा विहितमतयो निर्विकल्पे समाधौ ज्ञानो
त्सेकाद्विघटिततमोग्रंथयः सत्वनिष्ठाः ॥ यं वीक्षंते कमपि तमसां ज्योतिषां वा परस्तात्तं मो
हांधः कथमयममुं वेत्तु देवं पुराणं ॥ स्वयं वा परामर्शो यथा । षडधिकदशनाडीचक्रमध्यस्थि
तात्मा हृदि विनिहितरूपा सिद्धिदस्तद्विदां यः । अविचलितमनोभिः साधकैर्मृग्यमाणः सज
यति परिणद्धः शक्तिभिः शक्तिनाथः । अधमप्रकृत्युक्तिषु योगुणः । यथा । फुल्लुक्कुरं कलम

कूरणेण हं वहंति जे स्सिंदुवारविडमहवल्लहा दे। जे गालिदसमहेस्सा दहिणो सरीरस्सा तो किंच
मुद्भ्रविवेअइल्लपसूणपुंजा। अत्र कुलममन्मथमहिषादधिनारुद्धारमा। अपिविदूषक
स्योक्तौ। न्यूनपदं क्वचिद्गुणो यथा। गाढालिंगनवामनीकृतकुचप्रोद्भूतरोमोद्गमा सांद्र
स्नेहरसातिरेकविगलच्छ्रीमन्नितंबांबरा॥ मा मा मानद माति मामलमिति क्षामा
क्षरोल्लापिनी सुप्ता किंनु मृता नु किं मनसि मे लीना विलीना नु किं॥१॥ क्वचिन्न गुणो न दो
षः। यथा। तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति स्वर्गायोत्पतिता भवेन्मयि पुनः
र्भावार्द्रमस्या मनः॥ तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनी सा चात्यंतमगोचरं
नयनयोर्यातेति कोऽयं विधिः॥ अत्र पिहिते सतो नानंतरं नैतदित्येतैर्न्यूनैः पदैर्विशेषबुद्धेर
करणान्न गुणः॥ उत्तरा प्रतिपत्तिः पूर्वां प्रतिपत्तिं बाधत इति न दोषः। अधिकपदं क्वचि
द्गुणः। यथा। यथा। यद्वंचनाहितमतिर्बहु चाटुगर्भं कार्योन्मुखः खलजनः कृतकं ब्रवीति॥
तत्साधवो न न विदंति विदंति किंतु कर्तुं वृथा प्रणयमस्य न पारयंति॥ अत्र विदंतीति द्वि
तीयमन्ययोगव्यवच्छेदपरं॥ यथा च। वद वद जितः स शत्रुर्न हतो जल्पंश्च तव तवास्मी
ति। चित्रं चित्रमरोदीद्धा हेति परं मृते पुत्रे। इत्येवमादौ हर्षभयशोकादियुक्ते वक्तरि। क
थितपदं गुणो लाटानुप्रासे अर्थांतरसंक्रमितवाच्ये विहितस्यानुवाद्ये च।

55

५५

क्रमेणोदाहरणानि। सितकरकररुचिरविभा विभाकराकार धरणिधर कीर्त्तिः। पौरुषक
मला कमला सापि तवैवास्ति नान्यस्य॥१॥ तालोडा अतिगुणाज्ञालादेसहि अर्थं हि धेयां
त्ते। पिङ्क्तिरणणएगा आङ्ङ्हों ति कमलाइ कमलाइं॥ जितेन्द्रियत्वं विनयस्य कारणं गुण
प्रकर्षो विनयादवाप्यते गुणप्रकर्षेण जनोनुरज्यते जनानुरागप्रभवा हि संपदः॥ पतत्
प्रकर्षामिषिक्त क्वचित् गुणः। यथा। उदाहृते गागता प्राह्नेत्यादौ। समाप्तपुनरात्तं क्वचिन्न गुण
दोषः॥ यत्र न विशेषणमात्रदानार्थं पुनर्ग्रहणमपि तु वाक्यान्तरमेव क्रियते। यथात्रै
व प्रागप्राप्तेत्यादौ। अपदस्थसमासं क्वचिद् गुणः। यथा। उदाहृते रक्ताशोक इत्यादौ। ग
र्भितं तथैव। यथा। भमिअ वहत्थिअरेहो णिरंकुसो अह विवेअरहिओ वि। सिविणे वि
तुमंमि पुणो पत्तिहि भत्तुण पुलसिमि। अत्र पत्तिहीम इत्यस्य प्रतिपादनाय। एवम
न्यदपि लक्ष्यादेवोह्यं॥ व्यभिचारिरसस्थायिभावानां शब्दवाच्यता। कष्टकल्पनया
व्यक्तिरनुभावविभावयोः॥ प्रतिकूलभावादिग्रहो दीप्तिः पुनः पुनः। अकाण्डे प्रथनच्छे
दावंगस्याप्यतिविस्तृतिः॥६१॥ अंगिनोननुसंधानं प्रकृतीनां विपर्ययः॥ अनंगस्याभि
धानं च रसे दोषाः॥ स्युरीदृशाः॥६२॥ स्वशब्दोपादानं व्यभिचारिणो यथा॥ सव्रीडा
दयितानने सकरुणा मातंगचर्माम्बरे सत्रासा भुजगे सविस्मयरसा चन्द्रेमृतस्यं

दिनि॥ सर्व्वाङ्गकुसुमिता विलोकनविधौ दीना कपालोदरे पादस्यानवसंगमप्रणयिनी दृष्टिः शि-
वाया स्तवः॥ अत्र क्रीडादीनां ध्यानमात्रदयितानने मुकुलिता मातंगचर्माम्बरे सोत्कम्पा भु-
जगे निमेषरहिता चन्द्रेमृतस्यन्दिनि॥ मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे
इत्यादि तु युक्तं॥ रसशब्देन शृङ्गारादिशब्देन वा वाच्यत्वं क्रमेण यथा। तां मंगलश्रियं। किं-
चिदञ्चद्भुजमुल्लोकितां॥ नेत्रयोः कृतवतोस्य गोचरे कोप्यजायत रसो निरन्तरः॥ आ-
लोकयन्कोमलकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिरामरूपां॥ पश्यैष बाल्य-
मतिवृत्य विवर्त्तमानः शृङ्गारसीमनि तरंगितमातनोति। स्थायिनो यथा। संप्रहारे प्रह-
रणोः प्रहाराणां परस्परं। ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोप्यभूत्॥ अत्रोत्साहस्य। क-
र्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः। लीलाशिरोंशुकनिवेश-
विशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा॥ अत्रोद्दीपनालम्बनरूपाः शृङ्गारयोग्या
विभावा अनुभावपर्यवसायिनः स्थिता इति कष्टकल्पना॥ परिहरति रतिं मतिं लुनीते स्ख-
लतितरां परिवर्त्तते च भूयः॥ इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः॥
अत्र रतिपरिहासादीनां अनुभावानां करुणादावपि संभवात्कामिनीरूपो विभावो य-
त्नप्रतिपाद्यः। प्रसादे वर्त्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यंत्यंगान्यमृतमिव ते सि-
तु वचः॥ निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं प्रभवति गतः

56

५६

२४

कालहरणः॥ अशृंगारे प्रतिकूलस्य शांतस्यानित्यताप्रकाशनरूपो विभावस्तत्प्रकाशितो
निर्वेदश्च व्यभिचार्युपात्तः॥ णिहुअरमणम्मि विलोअणपहम्मि पडिए गुरूण मज्झम्मि। स
अलपरिहारहिअआ वणगमणं चेअ महइ वहू॥ अत्र सकलपरिहारवनगमने शांता
नुभावौ। इंधनाद्यानयनव्याजेनोपभोगार्थं वनगमने चेन्न दोषः॥ दीप्तिः पुनः पुनर्यथा।
कुमारसंभवे रतिविलापे। अकांडे प्रथनं यथा। वेणीसंहारे द्वितीयेंके। नेकवीरसंक्ष
येप्रवृत्ते भानुमत्या सह दुर्योधनस्य शृंगारवर्णने। छेदो यथा वीरचरिते द्वितीयेंके राघ
वभार्गवयोर्धाराधिरूढे वीररसे कंकणमोचनाय गच्छामीति राघवस्योक्तौ। अंगस्या
प्रधानस्यातिविस्तरेण वर्णनं। यथा। हयग्रीववधे हयग्रीवस्य। अंगिनोननुसंधानं यथा। रत्ना
वल्यां चतुर्थेंके बाभ्रव्यागमने सागरिकाया विस्मृतिः। प्रकृतयो दिव्या अदिव्याः
दिव्यादिव्याश्च वीररौद्रशृंगारशांतरसप्रधाना धीरोदात्तधीरोद्धतधीरललितधीरप्र
शांताः। उत्तममध्यमाधमाश्च। तत्र रतिहासशोकाद्भुतान्यदिव्योत्तमप्रकृतिवद्दिव्येष्वपि
किंतु रतिः शृंगारसंभोगरूपा उत्तमदेवताविषया न वर्णनीया। तद्वर्णनं हि पित्रोः संभोगव
र्णनमिवात्यंतमनुचितं। क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरंति॥ तावत्स वह्नि
र्भवनेत्रजन्मा भस्मावशेषं मदनं चकार॥ इत्युक्तवत् भ्रुकुट्यादिविकारवर्जितः सद्यः

57

फलवद् दोषः स्वःपातालगमनसमुद्रोल्लङ्घनाद्युत्साहश्च दिव्येष्वेव। अदिव्येषु तु यावदवदानं प्र
सिद्धमुचितं तावदेवोपनिबद्धव्यं अधिके तु निबध्यमाने असत्यप्रतिभासेन नायकवद्वर्ति
तव्यं न प्रतिनायकवदित्युपदेशो न पर्यवस्येत्। दिव्यादिव्येषु तूभयथापि। एवमुक्ते सोचि
त्यस्य दिव्यादीनां भिन्नधीरोदात्तादीनामप्यन्यथा वर्णने विपर्ययः। तत्र भवन्भगवन्निति स
मैनं नाधमेन वाच्यमिति संबध्यते। मुनिप्रभृतौ न राजादौ। भट्टारकेति परमेश्वरेति मु
निप्रभृतौ॥ प्रकृतिविपर्ययापत्तेर्वाच्यं। एवं देशकालवयोजात्यादीनां वेषव्यवहारादि
समुचितमेवोपनिबद्धव्यं। अनंगस्य रसानुपकारकस्य वर्णनं। यथा। कर्पूरमञ्जर्यां नायि
कया स्वात्मना च वसन्तस्य वर्णनमनादृत्य वन्दिवर्णितस्य राज्ञः प्रशंसनं॥ यथा ईदृशाद
ति नायिकापादप्रहारादिना नायककोपादिवर्णनं। उक्तं हि ध्वनिकृता। अनौचित्यादृते ना
न्यद्रसभङ्गस्य कारणं। प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परेति। इदानीं क्वचिद्दोषा अ
प्यते इत्युच्यते। न दोषः स्वपदेनोक्तावपि संचारिणः क्वचित्॥ यथा। औत्सुक्येन कृतत्वरा
सह भुवा व्यावर्तमाना ह्रिया तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः - ग्रेव
रमात्तसाध्वसरसा गौरी नवे संगमे संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः॥

46

अत्रौत्सुक्यशब्दइव तदनुभावो न तथा प्रतीतिकृत्। अत एव दूरादुत्सुकमित्यादौ व्रीडा
नुमानां विवलितत्वानामिवौत्सुक्यानुभावस्य सहसा प्रसरणादिरूपस्य तथा प्रति
पत्तिकारित्वाभावादुत्सुकमिति कृतं॥ संचार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा॥
बाध्यत्वेनोक्तिर्न परं न दोषो यावदङ्गत्तरसपरिपोषकृत्। यथा। क्वाकार्यं शशलक्ष्म
णः इत्यादौ अत्र वितर्कादिष्वङ्गतेष्वपि चिन्तायामेव विश्रान्तिरिति प्रकृतरसपरिपो
षः॥ पाण्डुक्षामं वदनं हृदयं सरसं तवालसं च वपुः। आवेदयति नितान्तं क्षेत्रियरोगं
सखि हृदन्तः। इत्यादौ साधारणत्वं पाण्डुतादीनामिति न विरुद्धत्वं॥ सत्यं मनोरमा रामाः
सत्यं रम्या विभूतयः॥ किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितमित्यत्राद्यमर्द्धं बाध्यत्वे
नैवोक्तं। जीवितादप्यधिकमपाङ्गभङ्गस्यास्थिरत्वमिति प्रसिद्धमं गुप्तेपमानतया प्रात्र
सत्शान्तमेव पुष्णाति। न पुनः शृङ्गाररसस्यात्र प्रतीतिः॥ तदङ्गप्रतिपत्तेः न तु विरोधो
न्युरिव करणमेत्र परिहारः॥ शान्तशृङ्गारयोर्नैरन्तर्यस्याभावात्॥ नापि काव्यशोभाक
रणं। सरतराऽनुप्रासमात्रद्वा तथाभावात्॥ आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः
रसान्तरेणान्तरितो नैरन्तर्येण यो रसः॥ वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रति

पक्ष्मगतत्वेन भयानकोऽनवेशयितव्यः ॥ शान्तशृङ्गारयोर्नैरन्तर्येण विरोध इति रसान्तरमन्तरे का
र्यं । यथा । नागानन्दे । शान्तस्य जीमूतवाहनस्य अहो गीतमहो वादित्रमित्यद्भुतमन्तर्निवेश्य
मलयवतीं प्रति शृङ्गारो निबद्धः ॥ न परं प्रबन्धे यावदेकस्मिन्नपि वाक्ये रसान्तरव्यव
धिना विरोधो निवर्तते यथा । भूरेणुदिग्धान्नवपारिजातमालारजोवासितबाहुमध्याः ॥
गाढं शिवाभिः परिरभ्यमाणान्सुराङ्गनाश्लिष्टभुजान्तरालः ॥ सशोणितैः क्रव्यभुजां स्फु
रद्भिः पक्षैः खगानामुपवीज्यमानान् ॥ संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः कल्प
लतादुकूलैः ॥ विमानपर्यङ्कतले निषण्णाः कुतूहलाविष्टतया तदानीम् । निर्दिश्यमाना
ल्ललनाङ्गुलीभिर्वीराः स्वदेहान्पतितानपश्यन् ॥ अत्र बीभत्सशृङ्गारयोरन्तः वीररसो नि
वेशितः ॥ स्मर्यमाणो विरुद्धोऽपि साम्येनाथ विवक्षितः ॥ अङ्गिन्यङ्गत्वमाप्तौ यौ तौ न दुष्टौ
परस्परं ॥ यथा । अयं स रसनोत्कर्षीत्यादि पतद्भूरिश्रवसः समरभुवि पतितं हस्तमव
लोक्य तद्वधूरभिदधौ । अत्र पूर्वावस्थास्मरणं शृङ्गाराङ्गमपि करुणं परिपोषयति ।
दन्तक्षतानि करजैश्च विपाटितानि प्रोद्भिन्नसान्द्रपुलके भवतः शरीरे । दत्तानि रक्तम
नसा मृगराजवध्वा जातस्पृहैर्मुनिभिरप्यवलोकितानि । अत्र कामुकस्य दन्तक्षतादीनि यं

यथा चमत्कारकारिणी तथाङ्गिनस्य यथा चापरः। शृंगारात् तदवलोकनात्सस्पृहः तद्धेतद्दशो
ऽनुनयइति साम्यविवक्षा॥ क्रामंत्यः क्षतकोमलांगुलिगलद्रक्तैः सदर्भाः स्थलीः पादैः कल्पि
तयावकैरिव पतद्बाष्पांबुधौताननाः भीता भर्तृकरावलंबितकरास्त्वच्छत्रुनार्योऽधुना दा
वाग्निं परितो भ्रमंति पुनरप्युद्यद्विवाहादिना। अत्र चाटुके राजविषया रतिर्या प्रतीयते तत्र
करुण इव शृंगारोऽप्यंगमिति तयोर्न विरोधः॥ यथा। एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर
॥एवमाशाग्रहग्रस्तैः क्रीडंति धनिनोऽर्थिभिः॥ इत्यत्र एहीति क्रीडंति गच्छेति क्रीडंति इति क्री
डापेक्षयोरागमनगमनयोर्न विरोधः। क्षिप्तो हस्तावलग्नः प्रसभमभिहतोप्याददानोंऽशु
कांतं गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण॥ आलिंगन्योऽवधूतस्त्रिपु
रयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः॥
अत्र त्रिपुररिपुप्रभातिशयस्य करुणोऽङ्गं तस्य तु शृंगारः। तथापि न करुणे विश्रांतिरिति
तस्यांगतैव। अथवा। प्राग्यथा कामुक आचरति स्म तथाद्य शराग्निरिति शृंगारपरिपोषिते
न करुणेन मुख्य एवार्थ उपोद्बलितोऽङ्केति। गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते
प्रधानस्योपकारे हि तथा भूयसि वर्तते इति। प्राक्प्रतिपादिते रूपस्य रसस्य रसांतरेण
न विरोधो नाप्यंगांगिभावो भवतीति रसशब्देनात्र स्थायिभाव उपलक्ष्य

ते॥ इति काव्यप्रकाशे दोषनिर्णयो नाम सप्तम उल्लासः॥ ॥एवं दोषानुक्त्वा गुणालंकार
विवेकमाह॥ ये रसस्यांगिनो धर्माः शौर्यादय इवात्मनः॥ उत्कर्षहेतवस्ते स्युरचलस्थि
तयो गुणाः॥६६॥ आत्मन एव हि शौर्यादयो यथा नाकारस्य। तथा रसस्यैव माधुर्याद
यो न वर्णानां। क्वचित्तु शौर्यादिसमुचितस्याकारमहत्त्वादेर्दर्शनादाकार एवास्य शू
र इत्यादेर्व्यवहारादन्यत्राशूरेपि विततकृतित्वमात्रेण शूर इति क्वापि शूरेपि मूर्तिला
घवमात्रेण अशूर इत्यविश्रांतप्रतीतयो यथा व्यवहरंति। तद्वन्मधुरादिरसव्यंजकसु
कुमारवर्णानां माधुर्यादिप्रतीतेरमधुरादिरसांगानां वर्णानां सौकुमार्यादिमात्रेण मा
धुर्यादि माधुरादिरसोपकरणानां तेषामसौकुमार्यादेरमाधुर्यादि च रसपर्यंतवि
श्रांतप्रतीतिवंध्या व्यवहरंति। अत एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्य
ते। न तु वर्णमात्राश्रयाः। यथैषां व्यंजकत्वं तथोदाहरिष्यते। उपकुर्वंति तं संतं ये
ऽंगद्वारेण जातुचित्॥ हारादिवदलंकारास्तेऽनुप्रासोपमादयः॥ ये वाच्यवाचकलक्ष
णांगातिशयमुखेन मुख्यं रसं संभविनमुपकुर्वंति ते कंठाद्यंगानामुत्कर्षाधानद्वारे
ण शरीरिणोप्युपकारका हारादय इवालंकाराः॥ यत्र तु नास्ति रसस्तत्रोक्तिमात्रे वैचि
त्र्यपर्यवसायिता। क्वचित्तु संतमपि नोपकुर्वंति। अपसारय घनसारं कुरु कमलं हू

५८

रएवकिंक्रमलैः॥ अन्तमलमालिन्यमृणालैरिति वदन्ति द्विधा निश्चं बाला॥ इत्यादौ वाच्यक्रमु-
खेना मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं प्रमाथी निर्धूमो ज्वलति विधुतः पावक इव।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो न मां त्रातुं तातः प्रभवति न चाम्बा न भवती॥ ॥
इत्यादौ वाच्यमुखेनालंकारौ रसमुपकुरुतः॥ चित्ते चिहुट्टदि ण खुट्टदि सा गुणेसु संजारे
सु छदि दिविस्स दिद्धं मुहे सम्म॥ तो हल्लम्मि वट्टदि पयट्टदि कव्वबन्धे झाणेण कुट्टदि चिरं तरु-
णी तट्टी। इत्यादौ वाच्यक्रमेव। मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति क्रन्दत्स्व भ्रमरे-
षु वीक्ष्य दयितासक्तं पुरः सारसं॥ चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता
चक्रे केवलमर्गलेव निहिता जीवस्य निर्गच्छतः॥ इत्यादौ वाच्यमेव न तु रसं॥ अत्र बिस-
लताजीवरोधं न क्षमेति गलत्वानन्तु गुणोपमा॥ एष एव च गुणालंकारविभागः॥ एवं च
समवायवृत्त्या शौर्यादयः। संयोगवृत्त्या हारादय इत्यस्तु गुणालंकारविभागः॥ ओजः-
प्रभृतीनामनुप्रासादीनामुपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति ग-
डुलिकाप्रवाहेनैषां भेद इत्यभिधानमसत्॥ यदप्युक्तं काव्यशोभायाः कर्तारो धर्मा
गुणास्तदतिशयहेतवस्त्वलंकारा इति। तदपि न युक्तं। यतः किं समस्तैर्गुणैः का-

व्यवहारः उतकृतिपर्यैः॥ यदि समस्तैस्तत्कथमयमस्तु गुणा गौडीपांचालीचरीतिः स्या
त्॥ अथकृतिपर्यैस्तदा। अत्रावत्रगक्षलत्स्यग्निरुच्चैः प्राऽपः प्रोद्यन्नुल्लसत्येषधूमः॥
इत्यादावोजः प्रभृतिगुणगुणेगुसहकचक्राव्यवव्यवहारप्राप्तिः स्यात्॥ स्वर्गप्राप्तिरने
नैवदेहेनवरवर्णिनि॥ अस्याः रदच्छदरसोन्यक्करोति तरां सुधाम्॥ इत्यादौ विज्ञोयोऽति
व्यतिरेकौ॥ गुणनिरपेक्षौ का व्यव्यवहारस्य प्रवर्तकौ॥ इदानीं गुणानां भेदानाह॥ मा
धुर्यौजः प्रसादाख्यास्त्रयस्तेन पुनर्दश। क्रमेण लक्षणमाह॥ आह्लादकत्वं माधुर्यं
शृंगारद्रुतिकारकम्॥ शृंगारैरर्थात्संभोगे। द्रुतिर्गलितत्वमिववेश्वव्यत्वं पुनरोजःप्रसा
दयोरपि। करुणेविप्रलंभेशांतेचातिशयान्वितं॥ अत्येतद्रुतिहेतुत्वात् दीप्त्यात्मविस्त
तेर्हेतुरोजोवीररसस्थितिः। चित्तस्यविस्ताररूपदीप्तत्वजनकमोजः। बीभत्सरौद्ररसयो
स्याधिक्यंक्रमेणच। वीराद्बीभत्सेततोपिरौद्रेसातिशयमोजः। शुष्केंधनाग्निवत्स्व
च्छजलवत्सहसैवयः॥ व्याप्नोत्यन्यत्प्रसादोसौसर्वत्रविहितस्थितिः। अन्यत्व्याप्यत
मिहचित्तम्। सर्वत्रेतिसर्वेषुरसेषुसर्वेषुवर्णेषुसर्वासुरचनासु॥ ॥गुणवृ
त्यापुनस्तेषांवृत्तिः शब्दार्थयोर्मता॥ गुणवृत्योपचारेणतेषांगुणानामाकारे

शौर्यस्येव। कुतस्त्रय एव न दशेत्याह। केचिदंतर्भवंत्येषु दोषत्यागात्परे श्रिताः॥ अन्ये
भजंति दोषत्वं कुत्रचिन्न ततो दश॥ बहूनामपि पदानामेकपदवद्भासनात्मा यः
श्लेषो यश्चारोहावरोहक्रमं तपः समाधिर्या विकटत्वलक्षणोदारता यश्चौजो
मिश्रितः शैथिल्यात्मा प्रसादस्तेषामोजस्यंतर्भावः। पृथक्पदत्वरूपं माधुर्यं॥
भंग्या साक्षादुपात्तं प्रसादेनार्थव्यक्तिर्गृहीता। मार्गाभेदरूपा समता क्वचिद्दोषः॥
तथा हि॥ मातंगाः किमु वल्गितैरित्यादौ। सिंहाभिधाने मसृणवर्गत्यागो गुणः। कष्टत्व
ग्राम्यत्वयोर्दुष्टताभिधानात्तन्निराकरणेनापारुष्यरूपं सौकुमार्यमौज्ज्वल्यरूपा
कांतिश्च स्वीकृता। एवं न दश शब्दगुणाः॥ पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा।
प्रौढिर्व्याससमासौ व्याससमासौ चेति या चेति। च साभिप्रायत्वमस्य प्रौढिरोज इत्यु-
क्तेः॥ तद्वैचित्र्यमात्रं न गुणस्तदभावेऽपि काव्यव्यवहारप्रवृत्तेः। अपुष्टार्थत्वाधिक-
पदत्वानवीकृतः। त्वामंगलरूपाश्लीलग्राम्याणां निराकरणेन साभिप्रायत्वरूपमो-
जोर्थवैमल्यात्मा प्रसाद उक्तिवैचित्र्यरूपं माधुर्यमपारुष्यरूपं सौकुमार्यमग्राम्य-
त्वरूपोदारता च स्वीकृता अभिधास्यमानस्वभावोक्त्यलंकारेण रसध्वनिगुणी

भूतयोर्व्यङ्ग्याभ्यां च वस्तुस्वभावस्फुरत्स्वरूपार्थव्यक्तिदीप्तिरससत्स्वरूपाः कान्तिश्च स्वीकृतेः क्र
मकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्माश्लेषो विचित्रत्वमात्रं । अवैषम्यरू
पा समता दोषाभावमात्रं न पुनर्गुणः ॥ कश्च त्वनुन्मत्तो अन्यप्रस्तावेऽन्यदभिदध्या
त् । अर्थस्यायोडा निरन्यच्छाछैयायानेर्थो यदि न भवति दर्शनं । तत्कथं काव्यमित्यर्थ
दृष्टिरूपः ॥ समाधिरपि न गुणः ॥ तेन नार्थगुणा वाच्याः ॥ वाच्या वक्तुं न्याय्याः ॥ आत्तः ॥
शब्दगुणास्तु ये । वर्णाः समासो रचना तेषां व्यञ्जकतामिताः ॥७०॥७१॥ के कस्येत्याह ।
मूर्ध्नि वर्गान्त्यगाः स्पर्शा । अटवर्गा रणौ लघू । अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये रचना त
था ॥ टठडढवर्जा वर्गाः कादयो मान्ता । शिरसि निजवर्ग्यान्त्ययुक्तास्तथा रेफणकारौ ह्रस्वा
न्तरिता विति वर्णाः ॥ समासाभावो मध्यमसमासो वेति समासः । तथा माधुर्यवती प
दान्तरयोगेन रचना माधुर्यव्यञ्जिका ॥ उदाहरणं यथा ॥ अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गी
भिरङ्गीकृतमानतांग्याः ॥ कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि ॥
योग आद्यतृतीयाभ्यामन्त्ययोरेण तुल्ययोः ॥ टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओज
सः ॥ वर्गप्रथमतृतीयाभ्यामन्त्ययोस्तद्द्वितीयचतुर्थयो रेफेणाध उपर्युभयत्र वा

61

यस्यकस्यचित्तुल्ययोस्तेन तस्यैव संबंधः॥ टवर्गोर्ध्वणकारवर्ज्जः शकारषकारौ दीर्घ
समासो विकटीसंघटना ओजसः॥ उदाहरणं। मूर्ध्नामुद्वृत्तकृत्तेत्यादि श्रुतिमात्रेण श
ब्दानां यत्रार्थप्रत्ययो भवेत्॥ साधारणः समग्राणां स प्रसादो गुणः स्मृतः॥ समग्रा
णां रसानां संघटनानां च॥ उदाहरणं। परिम्लानं पीनस्तनजघनसंगादुभयतस्तनो
र्मध्यस्यांतः परिमिलनमप्राप्य हरितं॥ इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशांग्याः संतापं वदति बिसिनीपत्रशयनं॥ ७४॥ यद्यपि गुणपरतंत्राः संघट
नादयस्तथापि॥ वक्तृवाच्यप्रबंधानामौचित्येन क्वचित्क्वचित्। रचनावृत्ति
वर्णानामन्यमपीष्यते॥ क्वचिद्वाच्यप्रबंधानपेक्षया वक्त्रौचित्यादेव रचनादयः॥ य
था॥ मंथायस्तार्णवांतःप्लुतकुहरचलन्मंदरध्वानधीरः कोणाघातेषु गर्जत्प्रल
यघनघटान्योन्यसंघट्टचंडः॥ कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घा
तवातः केनास्मत्सिंहनादप्रतिरसितपटुदुंदुभिस्ताडितोयं॥ अत्र न हि वाच्यं क्रोधा
दिव्यंजकमतिनेयार्थं च काव्यमिति तद्व्यातिकूला उद्धतारचनादयः॥ वक्ता वा
त्र भीमसेनः॥ क्वचिद्वक्तृप्रबंधानपेक्षया वाच्यौचित्यादेव रचनादयो यथा॥ प्रो
च्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघातत्रासाकृष्टाश्वतिर्यग्वलितर

रविरथेनारुणेनेक्षमाणं॥ कुर्वन्काकुत्स्थवीर्यस्तुतिमिव मरुतां कंधरारंध्रभा
जां जांकारैर्भीमभेतन्निपतति वियतः कुंभकर्णोत्तमांगं॥ कचिद्वक्तृवाच्यानपेक्षया
प्रबंधोचिता एव ते। तथा ह्याख्यायिकायां शृंगारेपि न मसृणादयः कथायां रौद्रे
पि न दीर्घसमासादयः॥ एवमन्योप्यौचित्यमनुसर्तव्यं॥ इति काव्यप्रकाशे गु
णालंकारभेदो नियतगुणवर्णकथनो नामाष्टम उल्लासः॥ ॥ ॥ ॥ छ॥ ॥
करोतु देवी सततं सुखं मे॥ गुणविवेचने कृतेरलंकाराः प्राप्तावसरं इति शब्दालं
कारानाह॥ यदुक्तमन्यथा वाक्यमन्यथान्येन योज्यते श्लेषेण काक्वा वा ज्ञेया साव
क्रोक्तिस्तथा द्विधा॥ तथेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च। तत्र पदभंगे श्लेष
ण यथा॥ नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो वामानां प्रियमादधाति
हितकृन्नैवाबलानां सवान्॥ युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः साम
र्थ्यं भवतः पुरंदरमतं छेदं विधातुं कुतः॥ अभंगश्लेषेण यथा। अहो केनेदृशी बु
द्धिर्दारुणा तव निर्मिता॥ त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्॥ काक्वा यथा॥
गुरुजनपरतंत्रतया दूरतरं देशमुद्यतो गंतुं॥ अलिकुलकोकिलकलिते नेतिस

रिवस्तुरसितसमयेसः॥ वर्णसाम्यमनुप्रासः॥ स्वरवैसादृश्येपि व्यंजनसदृशत्वं वर्ण
साम्यं॥ रसाद्यनुगतः प्रकृष्टोन्यासोनुप्रासः। छेकवृत्तिगतोद्विधा। छेकाविदग्धा वृ
त्तिर्नियतवर्णगतोरसविषयोव्यापारः। गत इति छेकानुप्रासोवृत्त्यनुप्रासश्च॥ क्रमेत
योः स्वरूपमित्याह। सोनेकस्यसकृत्पूर्वः॥ अनेकस्यार्थाद्व्यंजनस्यसकृदेकवारंसाद
श्यं छेकानुप्रासः॥ उदाहरणं॥ ततोरुणपरिस्पंदमंदीकृतवपुः शशी॥ दध्रे कामपरि
क्षामकामिनीगंडपांडुतां॥ एकस्याप्यसकृत्परः। एकस्यापिशब्दादनेकस्यव्यंजनस्य
द्विर्बहुकृत्वोवासादृश्यंवृत्त्यनुप्रासः। तत्रमाधुर्यव्यंजकैर्वर्णैरुपनागरिकेष्यते॥
ओजःप्रकाशकैस्तैस्तुपरुषा। उतयत्रापिप्रागुदाहृता। कोमलापरैः॥ परैःशेषैः॥ तामे
वकेचिद्ग्राम्येतिवदंति॥ उदाहरणं॥ अपसारयघनसारंकुरुहारंदूरएवकिंकमलैः॥ अ
लमलमालिमृणालैरितिवदतिदिवानिशंबाला॥ केषांचिदेषावैदर्भीप्रमुखारीतयो
मताः॥ एतास्तिस्रोवृत्तयोवामनादीनांमतेवैदर्भीगौडीपांचाल्याख्यारीतयउच्यंते॥
शाब्दस्तुलाटानुप्रासोंभेदेतात्पर्यमात्रतः॥ शब्दगतोनुप्रासः॥ शब्दार्थयोरभेदेपिता
त्पर्यमात्रभेदात्लाटानुप्रासः॥ एषपदानुप्रासइत्यन्ये। पदानांसःसइतिलाटानुप्रासः॥ उ

दाहरणं॥ यस्य न सविधे दयिता दववदहनस्तुहिनदीधितिस्तस्य। यस्य च सविधे दयिता दव
वदहनस्तुहिनदीधितिस्तस्य॥ पदस्यापि॥ अपि शब्देन सइति समुच्चीयते। उदाहरणं।
वदने वरवर्णिन्यास्तस्याः सत्यं सुधाकरः सुधाकरः किन्तु पुनः कलंके विकलो भवेत्॥
वृत्तावन्यत्र तत्र वा। नाम्नः सवत्सवत्सोऽस्य। एकस्मिन्समासे भिन्ने वा समासे समासा
रुचिर विभा विभाकरा कारधरणिधवकीर्तिः॥ पौरुषकमला कमला सापि तवैवा
स्तिनान्यस्य॥ तदेवं पंचधामतः॥ अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिर्यम
मुच्यते। वत्तुमिसर्थेसतीस्कलं॥ सेतिसरोरस इत्यादि वैलक्षण्येन नतेनैव क्रमेण
स्थिता॥ पादतद्भागवृत्तित्वाद्यायनेकतां॥ प्रथमो द्वितीयादौ द्वितीयस्तृतीयादौ तृतीय
श्चतुर्थे प्रथमस्त्रिष्वपीति सप्त॥ प्रथमश्चतुर्थे द्वितीयस्तृतीय इति पुनः प्रथमो द्विती
ये तृतीयश्चतुर्थ इति तदेवं पादयमकं नवभेदं। आर्द्यावृत्तिः श्लोकावृत्तिश्चेति द्वे। द्वि
धा विभक्ते पादे प्रथमादिपादादिभागः पूर्ववद्द्वितीयादिपादादिभागे षंतभागेंतभागे

छिन्तिवंशानिर्भेदाः॥श्लोकांतरेहिनमागवर्त्तिः॥त्रिखंडेत्रिंशता।चतुःखंडेचत्वारिंशता॥
प्रथमपादादिगतानांसार्द्धादिभागोद्वितीयपादादिगते आद्यार्द्धादिभागेयस्यतद्दशसन्न्यर्थ
तानुसारेणनानेकभेदं॥अंतादिक्रमाद्यांतवक्रंतत्समुच्चयःमध्यादिक्रमादिमध्यमेतम
ध्यंमध्यांतिवक्रंतेषांसमुच्चयस्तथातस्मिन्नेवपादे।आद्यादिभागानांमध्यादिनोतेष
नियतेचस्थानेआवर्त्तिरिति।प्रभूतभेदंतदेतत्काव्यमद्भुतमितिनास्यभेदलक्ष
णंकृतंदिङ्मात्रंचोदाह्रियते।सान्नारीसरणोमायमाराध्यविधुशेखरं॥सन्नारीभरणो
मायततस्त्वंपृथिवीजय॥विनायमेनोनयतासुखादिना॥विनायमेनोनयतासुखा
दिना॥महाजनोदीयतमानसादरं महाजनोदीयतमानसादरं॥सत्वारंभवतोव
रूपमवत्लेबितरवं॥सर्वदारणमानैषीदवानलसमास्थितः॥सत्वारंभवतोऽवरूप
मवत्लेबिततारवं॥सर्वदारणमानैषीदवानलसमास्थितः॥ अनंतमहिमव्याप्त
विश्वांवेधानवेदयां॥याचमातेवसडातेगणेतमानवेदयां॥यदानतोयदानतोन
यासयंनयासयं॥शिवेहितांशिवेहितांस्मरामितांस्मरामितां॥सरस्वतिप्रसादंमे
स्थितिंचित्रसरस्वति।सरस्वतिकुरुक्षेत्रकुरुक्षेत्रेसरस्वति॥ ॥संसारसारकंदर्पेण

कंदर्पेण ससारसा ॥ शारन्नावाना बिभ्राणा ना बिभ्राणा शारन्नवा ॥ मधुपराजिबराजि-
तमानिनीजनमनः सुमनःसुरभिः श्रियं ॥ अभृत वारितवारिजविप्लवं स्फुटि-
तमाम्रततामवनं जगत् ॥ एवं वैचित्र्यसहस्रैः स्थितमन्यदुन्नेयं ॥ वाच्यभेदेन भिन्ना य-
द्युगपद्भाषणस्पृशः ॥ श्लिष्यंति शब्दाः श्लेषोयमक्षरादिभिरष्टधा ॥ अर्थभेदेन शब्द-
भेददर्शने काव्यमार्गे स्थितो न गणपतद्भति नये नये वाच्यभेदेन भिन्ना अपि शब्दा य-
द्युगपदुच्चारणेन श्लिष्यंति भिन्नं स्वरूपमपकुर्वते स श्लेषः ॥ स च वर्णपदलिंग-
भाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा ॥ क्रमेणोदाहरणानि ॥ अलंका-
रः शंकाकरनरकपालं परिकरः प्रशीर्णो भृंगी वसनमजपः एको गतवयाः ॥ अवस्थे-
यं स्थाणोरपि भवति सर्वामरगुरोर्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी ॥ पृथु-
कार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ॥ विलसत्करेणुगहनं संप्रति सममावयोः
सदनं ॥ भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी ध्यानालंबनतां समाधिनि-
रतैर्नीते हितप्राप्तये ॥ लावण्यस्य महानिधी रसिकतां लक्ष्मी दृशोस्तन्वती युष्मा-
कं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥ एष वचनश्लेषोपि ॥ महदे सुरसंधम्मे

६५

तमवसमासंगमागमाहरणे॥ हरवद्भशरणं तं चित्तमोहमवसरकुमे सहसा॥ अयं सर्वा
णि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति॥ सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः॥
रजानिरमणमौलेः पादपद्मावलोकक्षणसमयपराप्तापूर्वसंपत्सहस्त्रं॥ प्रथयति
वहमध्येऽत्तु चित्तप्रसादादहमुचितरुचिः स्वां नंदिलासां तथामे॥ सर्वस्वं हर सर्वस्य
त्वं भवछेदतत्परः॥ नयोपकारसांमुख्यमायासि तनुवर्त्तनं॥ तामेदाभावाद्यक्रत्यादे
र्भेदोपि न च मोभवेत्॥ नवमोपीसपिसैन्नक्रमे॥ उदाहरणं॥ योसकृत्परगोत्राणां
पक्षछेदक्षणक्षमः॥ शतकोटिदतांबिभ्रद्विबुधेंद्रः स राजते॥ अत्र प्रकरणादि
नियमाभावाद्द्वावप्यर्थौ वाच्यौ न तु ध्वनिताद्गुणभेदाद्भिन्नप्रयत्नोच्चार्याणां
तद्भेदाद्भिन्नप्रयत्नोच्चार्यमाणानां शब्दानां संबंधालंकारांतरगतिमोक्षप्रिहे
तुः शब्दश्लेषोऽर्थश्लेषश्चेति। द्विविधोप्ययमर्थालंकारमध्ये पठितो न्यैरलंकृप
मयं शब्दालंकारः॥ उच्यते॥ इह दोषगुणालंकाराणां शब्दार्थगतत्वेन यो विभागः॥
सोन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते॥ तथाहि। कष्टत्वगाढत्वाद्यनुप्रासादयो व्यं
र्थत्वादिगाढत्वादयमादयस्तद्भावतदभावानुविधायित्वादेव शब्दार्थगतत्वेन व्य

वस्त्वापत्तेश्च यं च पद्मवातात्रमात्स्वल्करविराजितेत्यभंगश्लेषः॥ अमातसंध्येवा
स्वायफलतुब्धोहि तत्र देति सभंगश्लेषश्चेति द्वावपि शब्दैकसमाश्रयाविति द्वयोर
पि शब्दश्लेषत्वमुपपन्नं। न त्वाद्यस्यार्थश्लेषत्वमर्थश्लेषस्य तु स विषयो यत्र परि
वर्त्तनेपि न श्लेषत्वखंडना॥ यथा॥ स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं॥
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च॥ न चायमुपमाप्रतिभोत्पत्तिहेतुः श्ले
षो अपि तु श्लेषप्रतिभोत्पत्तिहेतुरुपमा॥ तथाहि॥ कमलमिव मुखं मनोज्ञमेतत्कचतित
रामित्यादौ गुणसाम्ये क्रियासाम्ये उभयसाम्ये चोपमा॥ तथा सकलकलं पुरमेतज्जातं
संप्रति सुधांशुबिंबमिवेत्यादौ शब्दमात्रसाम्येपि सा युक्तैव॥ तथा ह्युक्तं रुद्रटेन स्फुटम
र्थालंकारावेतावुपमासमुच्चयौ॥ किं त्वाश्रित्य शब्दमात्रं सामान्यमिहापि संभवत इति
॥ न च कमलमिव मुखमित्यादि साधारणधर्मशून्य उपमाया विषय इति वक्तुं युक्तं पू
र्णोपमाया निर्विषयत्वापत्तेः॥ देवत्वमेव पातालमाशानां त्वं निबंधनं॥ त्वं चामरम
रुद्भूमिरेको लोकत्रयात्मकः॥ इत्यादिः श्लेषस्य चोपमाद्यलंकारविविक्तोस्ति विष

65

यइति द्वयोरर्थयोर्भेदेनाङ्गीकरणे वा उपपत्तिपर्यालोचनया तूपमाया एवायं युक्तो विषयोन्य
थाविषयापहार एव पूर्णोपमायाः स्यात्॥ न च अविंदुसुंदरीनियमालेह्लावत्पाविं
दुके सत्र विरोधप्रतिभोत्पत्तिहेतुः श्लेषः अपितु श्लेषप्रतिभोत्पत्तिहेतुर्विरोधः॥ न
ह्यत्रार्थद्वयप्रतिपादकशब्दश्लेषोद्वितीयार्थस्य प्रतिभानमात्रस्य प्ररोहाभावात्
न च विरोधाभास इव विरोधः श्लेषाभास इव श्लेषस्तस्मादेवमादिषु वाक्येषु श्ले
षप्रतिभोत्पत्तिहेतुरलंकारांतरमेव॥ तथा च॥ सद्वंशमुक्तामणिः॥ नाल्पः कविरिव
स्वल्पश्लोको देवमहान् भवान्॥ अनुरागवती संध्या दिवसस्तत्पुरःसरः॥ अहो दैवगति
श्चित्रा तथापि न समागमः॥ आदाय चापमचलं कृत्वाहीनं गुणं विषमदृष्टिः॥ यश्चित्रमच्यु
तशरो लक्ष्यमभांक्षीन्नमस्तस्मै॥ इत्यादावेकदेशविवर्तितरूपकव्यतिरेकसमासोक्ति
विरोधित्वमनुचितं न तु श्लेषत्वं॥ शब्दश्लेषइति चोच्यते॥ अर्थालंकारमध्ये च लक्ष्य
तइति कोयं नयः॥ किं च वैचित्र्यमलंकारइति य एव कविप्रतिभासंरंभगोचरस्तत्रै
व विचित्रतेति सैवालंकारभूमिः॥ अर्थमुखप्रेक्षित्वमेतेषां शब्दानामिति चेदनुग्रा

सादीनामपि तथैवेति तेऽप्यर्थालंकाराः किं नोच्यंते रसादिव्यंजकस्वरूपवाच्यविशेष
सव्यपेक्षत्वेपि ह्यनुप्रासादीनामलंकारता। शब्दगुणदोषाणामप्यर्थापेक्षयैव गुणदो
षता। अर्थगुणदोषालंकाराणां शब्दापेक्षयैव स्थितिरिति। तेपि शब्दगतत्वेनोच्यंतां।
विधौ वक्रे मूर्ध्नि साक्षौ वर्णादिभ्नेषु एवं प्रयत्नोच्चार्यत्वे भश्लेषत्वं शब्दभेदेपि प्रसज्य
तीति एवमादि स्वयं विचार्यं। तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता॥ संनिवेशवि
शेषेण यत्र वर्णाः खड्गमुरजपद्माकारमुल्लासयंति तच्चित्रं। काव्यं। कष्टकाव्यमेतदिति
दिङ्मात्रं प्रदर्श्यते। मारारिशक्ररामेभमुखैरासारसंहसा। सारारब्धस्तवा नित्यं तदर्त्ति
हरणक्षमा॥ माता नतानां संघट्टः श्रियां बाधितसंभ्रमा॥ मान्याथ सीमा रामाणां शं मे
दिश्यादुमादिजा॥ खड्गः॥ सरला बहुलारंभतरलालिबलारवा। वारला बहुलामंदक
रला बहुलामला॥ मुरजबंधः॥ भासते प्रतिभासाररसाभाताहताविभा॥ भावितात्मा
शुभा वादे देवाभा बत ते सभा॥ पद्मं॥ रसासाररसासारसायताक्षक्षतायसा॥ सानावान
तवातासा रक्षतस्त्वस्त्वतक्षर॥ सर्वतोभद्रः॥ संभवि भौप्यन्ये भेदाः शक्तिमात्रप्रकाशका
श काननु काव्यस्वरूपतां दधतीति न प्रदर्श्यंते॥ पुनरुक्तवदाभासो विभिन्नाकार

शब्दगा॥ एकार्थतेवातिन्नरूपसार्थकानर्थकशब्दनिष्ठं एकार्थत्वेनमुखभासनं पुनरुक्तवदा-
भासः॥ सचशब्दस्यसभंगाभंगरूपकेवलमितः॥ उदाहरणं॥ अरिवधदेहशरीरः सहसार-
थिसूततुरगपादातः॥ तानिसदानवसागेस्थिरतायामवनितलतिलकः॥ उदाहरणं॥ भ-
वकासत्यंगनारामाः कौतुकानंदहेतवः॥ तस्यराज्ञः सुमनसोविबुधाः पार्श्ववर्तिनः॥ तथाश-
ब्दार्थयोरयं॥ उदाहरणं॥ तनुवपुरजघन्योसौकरिकुंजररुधिररक्तखरनखरः॥ तेजोधा-
ममहःपृथुमनसामिंद्रोहरिर्जिष्णुः॥ अत्रैकस्मिन्पदेपरिवर्तितेनालंकारइतिशब्दाश्र-
योऽपरस्मिंस्तुपरिवर्तितेपिसनहीयतइत्यर्थनिष्ठइत्युभयालंकारोयं॥ इतिकाव्यप्रका-
शेरसवर्णनंनामनवमउल्लासः॥ ॥सुरेंद्रचूडामणिरंजितांघ्रिर्विरंचिचित्तस्थि-
तचारुमूर्तिः॥ अथालंकारानाह॥ साधर्म्यमुपमाभेदे॥ उपमानोपमेययोरेवकार्यकारणा-
दिकयोः साधर्म्यंभवतीति तयोरेवसमानेनधर्मेणसंबंधउपमा॥ भेदग्रहणमनन्वय-
व्यवच्छेदाय॥ पूर्णालुप्ताच॥ उपमानोपमेयसाधारणधर्मोपिमाप्रतिपादकानामुपा-
दानेपूर्णा॥ एकस्यद्वयोस्त्रयाणांवालोपेलुप्ताः साग्रिमाः श्रौत्यार्थीचभवेद्वाक्ये

समासे तद्धिते तथा ॥८॥ अग्रिमा पूर्णा । यथेववादिशब्दा यत्परास्तस्यैवोपमानताप्रती
तिरिति यद्यप्युपमानविशेषणान्येते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत्संबंधं
प्रतिपादयंतीति तत्सद्भावे यथा श्रौत्युपमा । तथैव तत्र तस्येवेत्यनेनेवार्थे विहितस्य व
तेरुपादाने तेन तुल्यमित्यादावुपमेय एव । तत्तुल्यमस्येत्यादौ चोपमान एव इदं च तच्च
तुल्यमित्युभयत्रापि तुल्यादिशब्दानां विश्रांतिरिति साम्यपर्यालोचनया तुल्यताप्रतीति
रिति तत्र साधर्म्ये सार्थत्वात्तुल्यादिपदोपादाने आर्थी ॥ तद्वत्तेन तुल्यमित्यादिना विहि
तस्य वतेः स्थितौ । इवेन नित्यसमासो विभक्तिलोपश्च पूर्वपदप्रकृतिस्वरत्वं चेति नित्य
समासे इवशब्दयोगे समासगा ॥ क्रमेणोदाहरणानि ॥ स्वप्नेपि समरेषु त्वां विजयश्रीर्न
मुंचति ॥ प्रभावप्रभवं कांतं स्वाधीनपतिका यथा ॥ चकितहरिणलोललोचनायाः क्रु
धि तरुणारुणतारहारिकांति । सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं
विधत्ते ॥२॥ अत्यायतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः ॥ शौ
रिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार ॥३॥ अवितथमनोर

६७

भपथगपथनेष्णुगुणगरिमगीतश्रीः॥ सुरतरुसदृशः स भवानभिलषणीयः क्षिती
श्वर न कस्य॥४॥ गांभीर्यगरिमा तस्य सत्यं गंगाभुजंगवत्॥ दुरालोकः स समरे निदाघां
बररत्नवत्॥५॥ स्वधीनभर्तृकाकांतेमञ्जमानायथालोकात्तरश्चमत्कारभूस्तथाऽय
श्रीरम्हदासेवनेनेत्यादिनाप्रतीयमानेन विनायद्यपि नोक्ते वैचित्र्यं॥ वैचित्र्यं चालंकाराः।
तथापि न ध्वनिगुणीभूतव्यंगव्यवहारः॥ न खलु व्यंग्यसंस्पर्शपरामर्शादत्र चारुताप्रती
तिरपि तु वाच्यवैचित्र्यप्रतिभासादेव॥ रसादिरूपस्तु व्यंग्योर्थोलंकारांतरं च सर्वत्रा
व्यभिचारीत्यगणयित्वैव न दलंकारा उदाहृताः॥ तत्र हि तत्वेन तदुपक्रियमाणा विरस
तामावहंतीति पूर्वापरविरोधाभिधानमिति न चोद्यं॥ तदुक्तधर्मस्य लोपे स्यानश्रौतीत
क्रते पुनः। धर्मः साधारणः॥ तद्धि तेक्लृप्त्यवादौ स्यार्थ्येव ते न पंच। उदा। धन्यस्यानन्यसा
मान्यसौजन्योत्कर्षशालिनः॥ करणीयं वचश्चेतः सत्यं तस्यामृतं यथा॥ आहवे क
रवालोसौ संपराये परिगमनू। प्रत्यर्थिसेनया दृष्टः कृतांतेन समः प्रभुः॥ करवालइ
वाचारस्तस्या वागमृतोपमा॥ विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे॥ उपमा

मान्तुपादानेवाक्यगाथसमाससगा॥८८॥सअलंकुरणपरवीसामसिरिविअरणंणस
रसकघस्स॥दीसइअहवणसुम्मइसरिअसंसमेत्रेण॥घवस्ससत्रकघसमभिति
सरिसमिसत्रचणरूणमितिपाठेएषैवसमाससगा॥वादेर्लोपेसमासेसकर्माधारक्य
चिक्यङिकर्मकर्त्रोर्णमुलि।वाशाष्टउपमायांतकूइतिवादेरूपमाप्रतिपादकस्यलोपे
षट्यांकर्मणोधिकरणाज्ञ्योयन्तेनक्यचाऽकर्तुः क्यङाचकर्मकर्त्रोरुपपदयोर्णमुलाच
भवेत्।यथा।ततःकुमुदनाथेनकामिनीगंडपांडुना॥नेत्रानंदेनचंद्रेणमाहेन्द्रीदिगलं
कृता॥तथा॥असितभुजगभीषणासिपत्रोरुहिरुहिकाहितचित्तचूर्णचारः॥पुलकि
ततनुरुत्कपोलकांतिःप्रतिभटविक्रमदर्शनेऽयमासीत्॥पौरंस्तुतीयतिजनेसमरां
तरेसावेतःपुरीयतिविचित्रचरित्रचंचुः॥नारीयतेसमरसीम्निकृपाणपाणेरालोक्य
तस्यललितानिसपत्नसेना॥मघोनिदघघर्मांशुदर्शोपत्रपतितपरः॥सपुनःपार्थसंचा
रंसंचरत्यवनीपतिः॥एतद्धिलोपेक्विप्समाससगा॥एतयोर्धर्मवाचोः॥उदा.सविताधि
धतिविधुरपिसवितरतितथादिनंतियामिन्यायामिनयंतिदिनानिसुखदुःखवश

६८

३६

न्नीलिते मनसि। परिपंथिमनोराज्यशतैरपि दुराक्रमः॥ संपरायप्रवृत्तो सौ राजते राजकुंजरः॥
धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते। यथा। ढुंढुल्लंतमरीहसि कंटअकलिआइ केअ
इवणाइं। मालइकुसुमसरिच्छं दमर भमंतो ण पाविहिसि॥ कुसुमेण सममिल्लपाठे वा
क्यगा। क्वचि वाचकोपमेयासे असेनिरासे। यथा। अरातिविक्रमालोकविकस्वरविलोचनः॥
कृपाणोदग्रदोर्दंडः स सहस्रायुधीयति॥ अत्रात्मोपमेयः। त्रिलोपो यत्र समासगा। त्रयाणां
वादिधर्मोपमानानामुदा। तरुणिमनिकृतावलोकनाकलितविलासचित्तलव्यावियहा॥
स्मरशरविसराचितांतरा मृगनयना हरते मुनेर्मनः॥ सा अत्र समासकोपमानेत्यादिना यदा
समासलोपो। क्रूरस्याचारस्याय इति लक्ष्येनाध्यवसानादयः शूलेनाश्चित्तसायः शूलिक
इत्यत्रि द्वयोर्लिः॥ चतुक्रूराचारोपमेयतेल्लप धर्मवादीनां लोपे त्रिलोपे इयमुपमा॥ एवं। एकोन
विंशतिर्लुप्ताः पूर्णाभिः पंचविंशतिभिः॥ अभयेनेव राज्यश्री दैन्ये न मनस्विता॥ असौ साधवि
षादेन पद्मिनीव हिमांभसा॥ इत्यभिन्ने साधारणधर्मः। ज्योत्स्नेव नयनानंदः सुरेव मदकारणं।
प्रभुत्वमिव समालोकसर्वलोकाननं तावनीतिभिन्ने वा तस्मिन्नेवकुसेवव वहूपमानोपादाने मालोप
मा॥ यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्ने भिन्ने साधारणधर्मे च। अनवरतकनक
वितरणजलल्लव भृत करतरंगिता थिततः भाति निरिव पतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरति

विमलः ॥ भाति रिपुमूर्तिर्मधुरा मूर्तिरिव समागमाभावचिता ॥ तस्य समेव च जयश्रीः शक्या जेतुं नृ
पस्य न परेषां ॥ इत्यादिकारणतोपमा च न लक्षिता ॥ एवंविधवैचित्र्यसहस्रसंभवादुक्तभे
दानतिक्रमाच्च ॥ उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ॥ अनन्वयः ॥ उपमानान्तरसंबंधाभावो
नन्वयः ॥ उदा० न केवलं भाति नितांतकांतिर्नितंबिनी सेव नितंबिनीव यावद्विलासायुध
लास्यवासास्ते तद्विलासा इव तद्विलासाः ॥ विपर्यास उपमेयोपमा तयोः ॥ तयोरुपमानोप
मेययोः परिवृत्तिरर्थाद्वाक्यद्वये ॥ इतरोपमानव्यवच्छेदपरा उपमेयेनोपमेयस्योपमेयोपमा ॥ उदा ॥
कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ॥ धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति बत यस्य ॥ संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ॥ समेनोपमानेन ॥ यथा ॥ उ
न्मेषं मम न सहते ज्ञातिवैरी निशायामिंदोरिंदीवरदलदृशा तस्य सौंदर्यगर्वः ॥ नीतः शांतिं
प्रसभमनया वक्त्रकांत्येति हर्षाल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥ लिंपतीव त
मोंऽगानि वर्षतीवांजनं नभः ॥ असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ इत्यादौ पूर्वार्द्धे व्याप
नादिलेपनादिरूपतया संभावितं ॥ ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः ॥ भेदोक्तौ य
था ॥ अयं किं मार्तंडः स खलु तुरगैः सप्तभिरितः कृशानुः किं सर्वाः प्रसरति दिशो नैष नियत
तां ॥ कृतांतः किं साक्षान्महिषवहनोऽसाविति चिरं समालोक्याजौ त्वां विदधति विकल्पा
न्प्रतिभटाः ॥ भेदोक्तावपि सनेनेन न केवलं निश्चयगर्भो यावन्निश्चयान्तोऽपि संदेहः स्वी

हृतः। यथा। इंदुः किं क्व कलंकः सरसिजमेतत्किमंबु कुत्र गतं॥ ललितसविलासवचनैर्मुख

मिति हरिणाक्षि निश्चितं परतः। किं तु निश्चयगर्भ इत्यादि निश्चयो न प्रतीयमान इत्युपे

क्षितो भेदाद्दृष्टेन॥ तदनुक्तौ यथा। अस्याः सर्गविधौ प्रजापतिरभूच्चंद्रो नु कांतिप्रदः शृं

गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो

निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो हरिः॥ तद्रूपकमभेदाय उपमानोपमेययोः। अति

साम्यादनपह्नुतभेदयोरभेदः। समस्तवस्तुविषयं श्रौता आरोपिता यदा। आरोपवि

षया इवारोप्यमाणाश्च शब्दोपात्तास्तदा समस्तानि वस्तूनि विषयोऽस्येति समस्तवस्तु

विषयं। आरोपिता इति बहुवचनमविवक्षितं॥ यथा। ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती

तारकास्थीन्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयं॥ द्वीपाद्द्वीपं भ्रमति दधती चंद्रमुद्रा

कपाले न्यस्तं सिद्धांजनपरिमलं लांछनस्य च्छलेन॥ अत्र पादत्रयेऽन्तर्धानव्यसनरसि

कत्वमारोपितधर्म एवेति रूपकपरिग्रहे साधकमस्तीति न संकराशंका न कार्या॥ श्रौ

ता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत्। केचिदारोप्यमाणाः शब्दोपात्ताः केचिदर्थसाम

र्थ्यादवसेया इत्येकदेशविवर्तनात्तथा। यथा। जरणंतेउरए करे कुणंतस्स मंडलग्गलअं।

रससंमुही वि सहसा परंमुही होइ रिउसेणा। अत्र नुरणस्यांतःपुरत्वमारोप्यमाणं

शब्दोपात्तमण्डलाग्रलतायाः। नायिकात्वं रिपुसेनायाश्च प्रतिनायिकात्वमर्थसामर्थ्यादवसीय
त इत्येकदेशविशेषेण वचनादेकदेशविवर्त्ति। सांगमेतदुक्तं हि भेदे सावयवं निरंगं तु शु
द्धं। यथा। कुरंगीवांगानि स्तिमितयति गीतध्वनिषु यत् सखीं कांतोदंतं श्रुतमपि पुनः प्रश्नयति य
त्। अनिद्रं यच्चांतः स्वपिति तदहो वेद्म्यभिनवां प्रवृत्तोस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकां॥
मालानुपूर्ववत् ७४ मालोपमायामिवैकस्मिन्निह बहव आरोपिताः॥ यथा। सौंदर्यस्य तरंगिणी
तरुणिमोत्कर्षस्य हर्षोद्गमः कांतेः कार्मणकर्म नर्मवचसामुल्लासनावासभूः। विद्या वक्रगिरां
विधेरनवधिप्रावीण्यसाक्षात्क्रियाः बाणाः पंचशिलीमुखस्य ललनाचूडामणिः सा प्रिया
॥ नियतारोपणोपायः स्यादारोपः परस्य यः। तत्परंपरितं श्लिष्टे वाचके भेदभाजि वा॥ ७५॥
यथा। विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते दुर्गामार्गणनीललोहित समित्स्वीकारवै-
श्वानरः॥ सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो साम्राज्यं वरवीर वत्सरशतं वैरिं-
चमुच्चैः क्रियाः॥ अत्र मानसमेव मानसं कमलायाः संकोच एव कमलानामसंकोचः। दुर्गाणा-
मार्गणमेव दुर्गाया मार्गणं। समितां स्वीकार एव समिधां स्वीकारः। सत्ये प्रीतिरेव सत्या-
म् प्रीतिः। विजयः परपराभव एव विजयोऽर्जुनः। एवमारोपणनिमित्तो हंसादेरारोपः। यद्य
पि शब्दार्थालंकारोऽयमिति स्फुटं च वक्ष्यते च। तथापि प्रसिद्ध्यनुरोधादत्रोक्तः। एकदेश

॥२८॥

॥२८॥

७०

विवर्ती दमन्यैरभिधीयते। भेदमात्रि यथा। आलानं जयकुंजरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचंडमहसो लीलोपधानं श्रियः। संग्रामामृतसागरप्रमथनक्रीडावि
धौ मंदरो राजन्राजति वीरवैरिवनितावैधव्यदस्ते भुजः॥ अत्र जयादेर्भिन्नशब्दवाच्य
स्य कुंजरत्वाद्यर्थारोपे भुजस्यालानत्वाद्यारोपोऽपेक्ष्यते। अलौकिकमहालोकप्रकाशि
तजगत्त्रयः। स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवान्॥ निरवधि च निराश्रयं च यस्य स्थि
तमनिवर्तितकौतुकप्रपंचं। प्रथम इह भवान्स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकं
द इति च मालारूपकमपि परंपरितं द्रष्टव्यं। किसलयकरैर्लतानां करकमलैः कामि
नीनां मनो जयति। नलिनीनां कमलमुखैर्मुखेंदुभिर्योषितां मदनः इत्यादिरसनारूप
कं परंपरितं न वैचित्र्यवदिति न लक्षितं। प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः।
उपमेयमसत्यं कृत्वोपमानं सत्यतया यत्स्थाप्यते सा त्वपह्नुतिः। उदा। अवाप्तप्राग
ल्भ्यं परिणतरुचः शैलतनये कलंको नैवायं विलसति शशांकस्य वपुषि। अमुष्येयं
मन्ये विगलदमृतस्यंदशिशिरे रतिश्रांता शेते रजनिरमणी गाढमुरसि। इत्थंवा॥ बत
सखि कियदेतत्पश्य वैरं स्मरस्य प्रियविरहकृशेऽस्मिन्रागिलोके तथाहि। उपवनसहकारो
द्भासिभृंगच्छलेन प्रति विशिखमनेनोट्टंकितं कालकूटं। अत्र हि न सभृंगाणि सहका

राणमपि तु स्वकालकूटाः शरा इति प्रतीतिः॥ एवं वा॥ अमुष्मिंल्लावण्यामृतसरसि नूनं मृगदृ
शः स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः॥ यदंगांगाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः॥ अत्र तु न रोमावलिरपि तु धूमशिखेय
मिति प्रतिपत्तिरेव प्रियंभंग्यंतरैरप्युक्ता॥ श्लेषः स वाक्ये एकस्मिन्यत्रानेकार्थता भवे
त्॥ ७१॥ एकार्थबोधकानामेव शब्दानां यत्रानेकोऽर्थः स श्लेषः। उदा. उदयमयते दिङ्मा
लिन्यं निराकुरुते तरां नयति निधनं निद्रामुद्रां प्रवर्त्तयति क्रियाः॥ रचयति तरां स्वैराचार
प्रवर्त्तनकर्त्तनं बत बत लसत्तेजःपुंजो विभाति विभाकरः॥ अत्राभिधाया अनियंत्रणा
द्वावप्यर्कभूपौ वाच्यौ। परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः प्रकृतार्थप्रतिपादकेन वा
क्येन श्लिष्टविशेषणमाहात्म्यान्न तु विशेष्यस्य सामर्थ्यादपि यदप्रकृतस्याप्यर्थस्या
भिधानं सा समासेन संक्षेपेणार्थद्वयस्य कथनात्समासोक्तिः। उदा. लहिऊण तुज्झ बाहु
प्फंसं जीए स को वि उल्लासो। जयलच्छी तुह विरहे ण हुज्जला दुब्बला णं कीसा। अत्र जयल
क्ष्मीशब्दस्य केवलस्य कांतावाचकत्वं नास्ति। निदर्शना। अभवद्वस्तुसंबंध उपमापरि
कल्पकः॥ ७३॥ निदर्शना दृष्टांतकरणं। उदा. क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं॥ अत्रोडुपेन सागरं तरणमिव मन्मतिः सूर्यवंश

वर्णनमभिरूपमायामेव पर्यवस्यति। यथा वा। उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिम
धाम्नि याति चास्तम्। वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्॥ अत्र कथ
मन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानं। दोर्भ्यां तितीर्षति तरंग
वतीभुजंगमादातुमिच्छति करे हरिणाङ्कबिम्बम्। मेरुं लिलङ्घयिषति ध्रुवमेष देव यस्ते गु
णानादिनु उद्यममादधाति॥ इत्यादौ मालारूपाप्येषा द्रष्टव्या॥ स्वस्वदेहत्वन्वयस्योक्तिः
क्रिययैव च सापरा। क्रिययैव स्वरूपस्य कारणयोः संबन्धो यदवगम्यते सा परा निद
र्शना॥ यथा। उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन्। शैलशेखरगतो दृष
त्कणश्चारुमारुतधुतः पतत्यधः॥ अत्र पातक्रियया पतनस्य लाघवे सत्युन्नतपदप्रा
प्तिरूपस्य कारणस्य च संबन्धोऽवगम्यते॥ १०॥ अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया
[illegible] अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा॥ सा च। कार्ये नि
मित्ते सामान्ये विशेषे प्रस्तुते सति। तदन्यस्य वचस्तुल्ये तुल्यस्येति च पंचधा॥ तदन्य
स्य कारणादेः क्रमेणोदा०। याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते नो कार्या
नितरां कृशासि कथयत्येवं सबाष्पे मयि। लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षु
षा दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः॥ अत्र प्रस्थानात्किं निवृत्तोऽसी
ति कार्ये पृष्टे कारणमुक्तम्। राजन् राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः कु

ङ्के भोलयमां कुमारसचिवैर्नाद्यापि किं मुह्यते ॥ इत्थं राज्ञस्तु कृत्यवाग्भिर्भयने मुक्तो धगैः
पंजरान्निष्क्रान्तस्थानयत्नोक्तप्रत्यवलम्भावे कैकमाभाषते ॥ अत्र प्रस्तुतानो यतं भवे तं ज्ञा
त्वा तदेवत्वदरयः पलाय्य गता इति कारणे प्रस्तुते कार्याभिधानं ॥ पतत्तस्य मुख्यात् क्रियत्क
मलिनीपत्रे कृणं वारिणोयमनुत्क्रामणि स्थिमंस्तास्तडः । अन्यदस्मादपि । अंगुल्यग्र
लघुक्रिया । नविलयि स्यादीयमानेश्शनैः कुत्रोड्डीय गतो ममेत्यनुदिनं निष्क्रान्तिनां तः शुचा
॥१॥ अत्र स्थाने जडानां महत्वसंभावनाभवतीति सामान्ये प्रस्तुते विशेषाभिधानं ॥ स्तुह
द्ध्रुवा बध्नाति लग्नमार्जनं करोति वैरगतिया तनेमयः ॥ स एव पूरुषः स पुमान् जनीति मा
न्सुजीवितं तस्य समाजनं श्रियः ॥ अत्र कृच्छ्रं निहत्य नरकासुरवधूनां दुःखं यदि शमय
सि तत्त्वमेव श्लाघ्य इति विशेषे प्रस्तुते सामान्याभिधानं ॥ तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रका
राः ॥ श्लेषसमासोक्तिः सादृश्यं च तुल्यान्तरस्याक्षेपहेतुः क्रमेणोदा॰ पुंस्त्वादपि प्रविच
लेद्यदि यद्यधोऽपि यायाद्यदि प्रणयनेन महानपि स्यात् । अभ्युद्धरेत्तदपि विश्वमितीदृशी
यं केनापि दिक्षु प्रकटिता पुरुषोत्तमेन ॥१॥ येनास्यभ्युदितेन चन्द्र मितः क्लान्तिरवो तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः ॥ क्षीणेनैतदनुष्ठितं यदि ततः किं लज्ज
से नो मनागप्यहो स्वं जडधामत्वमतु भवतो यद्योम्नि विस्फूर्जसे ॥१॥ अनपायवारिपरि
तः स्फरितां मुखस्यः किं नावदर्जितमनेन दूरेण वना । क्षारीकृतं च वडवादहने हुतं च

पातालकुक्षिकुहरे विनिवेशितं च॥१॥ इयं च क्वचिद्वाच्ये प्रतीयमानार्थानध्यारोपेऽपि
भवति। यथा। अधेरर्णः स्थगितभुवनाभोगपातालकुक्षेः पोतोपाया इह हि बहवो लंघ
नेऽपि क्रमेते॥ अहो रिक्तः कथमपि भवेदेष देवात्तदानीं को नाम स्यादवटकुहरालोकनेऽप्य
स्य शक्तः॥ क्वचित्त्वध्यारोपेण। यथा। कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैरा
ग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते॥ वामेनात्र वटस्तमध्वगजनः सर्वात्मना से
वते न च्छाययापि परोपकारकरणी मार्गस्थितस्यापि मे॥१॥ क्वचिद्देशेऽप्यध्यारोपेण यथा॥
सापूर्वा रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः सा मदविस्मृतस्वपरदिक्किं भू
यसोक्तेन वा। सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोऽद्याप्यसावन्तःशून्यकरो निषेव्यत इ
ति भ्रातः क एष ग्रहः॥ अत्र रसनाविपर्यासः शून्यकरत्वं च भ्रमरस्यासेवने न हेतुः कर्णचा
पलं तु हेतुः। मदः प्रकृतसेवने निमित्तं॥११॥ निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्॥
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनं॥१००॥ कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः॥
विज्ञेयातिशयोक्तिः सा ३ उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानं सैका। यथा। कु
मलमनंभसि कमले च कुवलये तेन कनकलतायां। सा च सुकुमारसुभगेत्युत्पातपरं
परा केयं॥१॥ अत्र मुखादि कमलादिरूपतयाध्यवसितं। यच्च तदेव तदेवान्यत्वेनाध्यवसी
यते सापरा। यथा। अण्णं लडहत्तणअं अण्णं च्चिअ कावि वत्तणच्छाया। सामा सामण्णपआ

वइ्णेरेहच्चिअअणेहाइ॥७१॥ यद्यर्थस्य यदिशब्देन चेच्छब्देन वा उक्तौ यत्कल्पनमर्थादसंभ
विनोऽर्थस्य सा तृतीया॥ यथा॥ राकायामकलंकं चेदमृतांशोर्भवेद्वपुः॥ तस्या मुखं तदा सा
म्यपराभवमवाप्नुयात्॥ कारणस्य शीघ्रकारितां वक्तुं कार्यस्य प्रागुक्तौ चतुर्थी॥ यथा॥
हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन॥ चरमं रमणीवल्लभ लोचनवि
षयं त्वया भजता॥७२॥ प्रतिवस्तूपमा तु सा॥१०१॥ सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थि
तिः॥ साधारणो धर्म उपमानोपमेयवाक्ययोः कथितपदत्वस्य दुष्टतयाभिहितत्वाच्छब्द
भेदेन यदुपादीयते सा वस्तुनो वाक्यार्थस्योपमानत्वात्प्रतिवस्तूपमा॥ यथा॥ देवी
भावं गमिता परिवारपदं कथं भजत्येषा॥ न खलु परिभोगयोग्यं दैवतरूपांकितं रत्नं॥ यदि द
हत्यनलोऽत्र किमद्भुतमित्यादिर्मालाप्रतिवस्तूपमा द्रष्टव्या॥ एवमन्यत्राप्यनुसरणीयं॥
॥७३॥ दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनं॥१०२॥ एतेषां साधारणधर्मादीनां दृष्टोन्तो
निश्चयो यत्र स दृष्टान्तः॥ यथा॥ त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितं॥ आलोके हि हि
मांशोर्विकसति कुमुदं कुमुद्वत्याः॥ एष साधर्म्येण वैधर्म्येण तु॥ यथा॥ तवाहवे साहसकर्मश
र्मणः करं कृपाणान्तिकमानिनीषतः॥ भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां
हि पांसवः॥७४॥ सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनां॥ सैव क्रियासु बह्वीषु कारकस्ये
ति दीपकं॥१०३॥ प्राकरणिकाप्राकरणिकानामर्थादुपमानोपमेयानां धर्मः क्रियादिरेकवारमेव य

ऽपादीयते तदेकस्थस्यैव समस्तवाक्यदीपकत्वाद्दीपकं॥ यथा॥ किं विणएण एधणेण आणाए
ण मणी केसराणि सीहाणं॥ कुलवालिआए अ थणा कत्तो छिप्पंति अमुआणं॥ कारकस्य
चैकक्रियानुक्रियासु सकृद्वृत्तिर्दीपकं॥ यथा॥ स्विद्यति कूणति वेल्लति विवलति निमिषति वि
लोकयति तिर्यक्॥ अंतर्नन्दति चुंबितुमिच्छति नवपरिणया वधूः शयने॥ मालादीपकमाद्यं
चेद्यथोत्तरगुणावहं॥ पूर्वेण पूर्वेण वस्तुनोत्तरोत्तरं चेदुपक्रियते तन्मालादीपकं॥ यथा॥ सं
ग्रामांगणसंगतेन भवता चापे समारोपिते संग्रामे परिपंथियोधिति वहे सांमुख्यमासादितं॥
कोदंडेन शराः शरैररिशिरस्तेनापि भूमंडलं तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयं॥
१५॥ नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता॥ १०४॥ नियतानां प्राकरणिकानामेवाऽप्राक
रणिकानामेव वा॥ क्रमेणोदाहरणानि॥ पांडुक्षाममवदनमित्यादि॥ कुमुदकमलनीरजालि
र्ललितविलासजुषोर्दृशोः पुरः का॥ अमृतममृतरश्मिरंबुजं प्रतिहतमेकपदे तदाननस्य॥१६॥
उपमानाद्यदन्यस्य व्यतिरेकः स एव सः॥ अन्यस्योपमेयस्य व्यतिरेकः आधिक्यं॥ क्षीणः क्षीणोपि
शशी भूयो भूयोभिवर्द्धते सत्यं॥ विरम प्रसीद सुंदरि यौवनमनिवर्ति यातं तु॥ इत्यादावुपमान
स्योपमेयादाधिक्यमिति यत्कैश्चिदवाचि॥ तदयुक्तं॥ अत्र यौवनगतास्थैर्यस्याधिक्यं हि विव
क्षितं॥ हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते॥१०५॥ शब्दार्थाभ्यामथाक्षिप्ते॥ श्लेषेपि तद्द्वि
रष्ट सः॥ तत्र व्यतिरेकस्य हेतुरुपमेयगतमुत्कर्षनिमित्तमुपमानगतं निकर्षकारणं॥ २॥ त

योर्द्वयोरुक्तिरेकतरस्याद्वयोर्वानुक्तिरिति अनुक्तित्रयं। एतद्भेदचतुष्टयमुपमानोपमेयभावेऽत्र
ष्टं न गतिपादितं। अर्थेन च क्रमेणोक्तौ च सार एवं भेदाः॥ आक्षिप्तचौपम्यतावेत एव। एवं द्वा
दश। एते श्लेषेपि भवंतीति चतुर्विंशतिर्भेदाः क्रमेणोदा०। असिमात्रसहायस्य प्रभूतारिप
राभवे॥ अन्यत्तु छत्रनस्येव नस्मयोऽस्य महाहवे॥ अत्रैव तु छेति महाघेतेरित्यनयोः पर्याये
णायुगपद्यनुपादानेऽभेदत्रयं। एवमन्येष्वपि द्रष्टव्यं। अत्रैव सदृशस्य संभवाच्छाष्टमौपम्यं
॥ असिमात्रसहायोपि प्रभूतारिपराभवे। नैवान्यत्तुच्छड़ान वल्सगर्वीयं धृतेर्निधिः॥ तुल्या
र्थेत्र यतिरित्यार्थमौपम्यं। इयं स्तुनयनादासीत्कृतनामरसश्रिया॥ आननेनाकुलंदेनजयं
तीऽकुलंकृतं॥ अत्रेवादितुल्यादिपदविरहे आक्षिप्तैवोपमा। जितेंद्रियतयासम्यग्विद्या
वृद्धनिषेविणः॥ अतिगाढगुणस्यास्य नाब्जवद्भंगुरा गुणाः॥ अत्रैवार्थवतिः। पुण्यश्लिष्ट
श्लिष्टः॥ अखण्डमंडलः श्रीमानयं पूर्णोधरणीपतिः॥ न निशाकरवज्जातु कलावैकल्यमा
गतः॥ अत्र तुल्यार्थवतिः। केवलशाब्दः श्लिष्टः॥ यथावा हरवन्न विषमदृष्टिर्हरिवन्न विभो
विधूतविततरूपः॥ रविवन्न चापि दुःसहकरतापितभूः कदाचिदसि। अत्र तुल्यार्थव
तिः विषयमादिशब्दाश्श्लिष्टाः॥ नित्योदितप्रतापेन त्रियामामीलितप्रभः॥ भास्वतानेन
भूपेन भास्वानेष विनिर्जितः॥ अत्राक्षिप्तैवोपमा॥ भास्वतेति। च श्लिष्टं। यथावा।

७४

स्वच्छात्मतागुणसमुल्लसितेंदुबिंबं बिंबप्रभाधरमकृत्रिमहृद्यगंधं ॥ यूनामतीव पिब
तां रजनीषु यत्र तृष्णांऽहारमधुनाननमंगनानां ॥ अत्रेवादेस्तुल्यादीनां च पदाना
मप्रयोगेपि श्लिष्टविशेषणैराक्षिप्तेवोपमा प्रतीयते । इत्येवं जातीयकाः श्लिष्टोक्तयो
ग्यस्य पदस्यैकस्योपादानेप्येपि भेदाः संभवंतीति तेप्यनयैव दिशा द्रष्टव्याः ॥१७॥ निषेधो
वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥१८॥ वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा म
तः ॥ विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्याशक्यवक्तव्यत्वमिति प्रसि
ध्यत्वं विशेषं वक्तुं निषेधो निषेध इव यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विवि
ध आक्षेपः क्रमेणोदा॰ एएहि किंपि कीएवि कएण णिक्किव भणामि अलमहवा ॥ अवि
आरिअ कज्जारंभआरिणीमरउ ण भणिस्सं ॥१॥ ज्योत्स्ना मौक्तिकदाम चंदनरसः
शीतांशुकांतद्रवः कर्पूरं कदलीमृणालवलयान्यंभोजिनीपल्लवाः ॥ अंतर्मानसमा
स्थया प्रभवतां तस्याः स्फुलिंगोत्कर व्यापाराय भवंति हंत किमनेनोक्तेन न ब्रूमहे ॥१८॥
क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना ॥१९॥ हेतुरूपक्रियायाः निषेधेपि तत्फ
लप्रकाशनं विभावना ॥ यथा ॥ कुसुमितलताभिरहताप्यधत्त रुजमलिकुलैरद
ष्टापि । परिवर्त्तते स्म नलिनीलहरीभिरलोलितापि घूर्णत सा ॥१९॥ विशेषोक्ति

सखंडेषु कारणेषु फलावचः। मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः। अनु
क्तनिमित्ता उक्तनिमित्ता अचिंत्यनिमित्ता च। क्रमेणोदा। निद्रानिवृत्तावुदिते द्युरत्ने स
खीजने द्वारपदं पराप्ते। श्लथीकृताश्लेषरसे भुजंगे चचाल नालिंगनतोंगना सा। क
र्पूर इव दग्धोपि शक्तिमान्यो जने जने। नमोस्त्ववार्यवीर्याय तस्मै मकरकेतवे। स एकः
स्त्रीणि जयति जगंति कुसुमायुधः। हरतापि तनुं यस्य शंभुना न हृतं तनुं॥२०॥ यथासं
ख्यं क्रमेणैव क्रमिकाणां समन्वयः॥ यथा। एकस्त्रिधा वससि चेतसि चित्रमत्र देव द्वि
षां च विदुषां च मृगीदृशां च॥ तापं च संमदरसं च रतीं च पुष्णन् शौर्योष्मणा च विनयेन च
लीलया च॥ सामान्यं वा विशेषो वा तदन्येन समर्थ्यते। यत्र सोर्थांतरन्यासः साधर्म्ये
णेतरेण वा॥ साधर्म्येण वैधर्म्येण वा सामान्यविशेषेण यत्समर्थ्यते विशेषो वा सामा
न्येन सोर्थांतरन्यासः। क्रमेणोदाहर। निजदोषावृतमनसामतिसुंदरमेव भाति विपरी
तं। पश्यति पित्तोपहतः शशिशुभ्रं शंखमपि पीतं। सुसितवसनालंकारायामिसादिगुणा
नामेव दोरम्याद्धुरि धुर्यो नियुज्यते। असंजातकिणस्कंधः सुखं स्वपिति गौर्गलिः। अहो
हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशं॥ त एव धन्याः सुहृदः पराभवं जगत्यदृ
ष्ट्वैव हि ये क्षयं गताः॥२२॥ विरोधः सोविरोधेपि विरुद्धत्वेन यद्वचः॥ वस्तुवृत्तेनाविरोधेपि

विरुद्धयोरिव यदभिधानं स विरोधः ॥ जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणस्त्रिभिः ॥११॥ क्रि
याद्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश ॥ क्रमेणोदा० । अभिनवनलिनीकिसलयमृणालवल
यादिदवदहनराशिः ॥ सुभगकुरंगदृशोऽस्या विधिवशतस्त्वद्वियोगपविपाते ॥१॥ गिरयोऽप्यनु
न्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगंभीराः ॥ विश्वंभराप्यतिलघुर्नरनाथ भवति किं नियतं ॥२॥
येषां कंठपरिग्रहप्रणयितां संप्राप्य धाराधरस्तीक्ष्णः सोऽप्यनुरज्यते च किमपि स्नेहं पराप्नो
ति च ॥ तेषां संगरसंगसक्तमनसां राज्ञां त्वया भूपते पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते
कौतुकं ॥३॥ आस्फजाति च जगादिदमवति च संहरति हेलयैव यो नियतं । अवसरवशतः शफरो
जनार्दनः सोऽपि चित्रमिदं ॥४॥ संततमुसलासंगाद्बहुतरगृहकर्मघटनया नृपते । द्विजपत्नी
नां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥५॥ पेशलमपि खलवचनं दहतितरां मान
सं सतत्त्वविदां ॥ परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति ॥६॥ क्रौंचाद्रिरुद्दामदृष
द्दृढोऽसौ यन्मार्गणानर्गलशातपातः । अभून्नवांभोजदलाभिजातः स भार्गवः सत्यमपूर्वस
र्गः ॥७॥ परिच्छेदातीत इत्यादि ॥८॥ अयं वारामेको निलय इति रत्नाकर इति श्रितोऽस्माभिस्तृष्णा
तरलितमनोभिर्जलनिधिः ॥ क एवं जानीते निजकरपुटीकोटरगतं क्षणादेनं ताम्यत्तिमिम
करमापास्यति मुनिः ॥९॥ मदमनंगजमद्य जलं निस्पंदतरं भिणीपरिष्वंगात् क्षितिनि

लकृत्यमितटजुषि स्रोतकृष्टजापगापि कालिंदी ॥२३॥ स्वभावोक्तिस्तु डिंभादेः स्वक्रियारूपवर्णनं
॥११॥ स्वयोस्तदेकाश्रययोः रूपं वर्णः संस्थानं च उदा० पश्चादंघ्री प्रसार्य त्रिकनतिविततं द्राघ
यित्वांगमुच्चैरासज्याभुग्नकंठो मुखमुरसि सटां धूलिधूम्रां विधूय ॥ घासग्रासाभिलाषाद
नवरतचलत्प्रोथतुंडस्तुरंगो मंदं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥२४॥ व्या
जस्तुतिर्मुखे निंदा स्तुतिर्वा रूढिरन्यथा ॥ व्याजेन व्याजरूपा वा स्तुतिः ॥ क्रमेणोदा० ॥ हित्वा त्वा
मुपरोधवध्यमनसां मन्ये न मौलिः परो लज्जावर्जनमंतरेण चरमामन्यत्र संदृश्यते ॥ यस्त्या
गं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥ हे
हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्र
तः ॥ तृष्यत्पांथजनोपकारघटनावैमुख्यलब्धायशोभारप्रोद्वहने करोषि कृपया साहायकं
यन्मरोः ॥२५॥ सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकं ॥१२॥ एकार्थमभिधायकमपि सहा
र्थस्य बलादुभयस्यावगमकं सा सहोक्तिः ॥ यथा ॥ सहदिअसणिसाहिं दीहरा सासदंडा स
ह मणिवलएहिं बाहधारा गलंति ॥ तुह सुहअ विओए तीअ उव्वेविरीए सह अ तणुलदाए दु
ब्बला जीविदासा ॥१॥ अत्र श्वासदंडादिगतं दीर्घत्वादि द्वाभ्यां दिवसनिशादिगतं तु स
हार्थसामर्थ्यात्प्रतिपाद्यते ॥२६॥ विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः कश्चि

७६

द्दृशो भनः क्वचिच्छोभनः॥ क्रमेणोदा०। अरुचिर्निशया विना शशी शशिनापि विना महत्तमः॥
उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः॥ मृगलोचनया विना विचित्रव्यवहार
प्रतिभाप्रभाप्रगल्भः॥ अमृतद्युतिसुंदराशयोयं सुहृदा तेन विना नरेन्द्रसूनुः॥२७॥ परिवृत्तिर्वि
निमयो योर्थानां स्यात् समासमैः॥१४॥ परिवृत्तिरलंकारः॥ उदा०। लतानामेतासां मुदितकुसुमानां
मरुद्दयं मत्तं लास्यं दत्वा श्रयति भृशमामोदमसमं। लतान्ताध्वान्तानामहह दृशामादाय सह
सा दधत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरं॥ अत्र प्रथमेर्द्धे समेन समस्य। द्वितीये उत्तमे
न न्यूनस्य। नानाविधप्रहरणैर्नृप संप्रहारे स्वीकृत्य दारुणनिनादवतः प्रहारान्। दृप्तारिवीर
विसरेण वसुंधरेयं निर्विप्रलंभपरिरंभविधिर्वितीर्णा। अत्र न्यूनेनोत्तमस्य॥२८॥ प्रत्यक्षा
इव यद्भावाः क्रियेते भूतभाविनः॥ तद्भाविकं॥ भूताश्च भाविनश्चेति द्वैधं॥ भूता यः कुवेरमित्रा
यो त्रास्तीति भाविकं॥ उदा० आसीदत्र नमत्रेति परयाभितवलोचने भाविभूषणसंभारां
साक्षात्कुर्वेत वाकृतिं॥ अत्राद्यर्थे भूतस्य द्वितीये भाविनो दर्शनं॥२९॥ काव्यलिंगहेतोर्वाक्य
पदार्थता॥१५॥ वाक्यार्थता। यथा। वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न प्रायः
क्वचिदपि भवंतं प्रणतवान्। नमन्मुक्तः संप्रत्यहमतनुरग्रेप्यनतिभाङ्महेश क्षंतव्यं तदि
दमपराधद्वयमपि॥१॥ अनेकार्थता। यथा। प्रणयसखीसलीलपरिहासरसाधि
गतैर्ललितशिरीषपुष्पहननैरपि ताम्यति यत्। वपुषि वधाय तत्र तव शस्त्रमुपक्षि

पतः पतत्सु शिरस्यकांड यमदंड इवैष भुजः ॥ एकपदार्थता यथा ॥ भस्मोद्धूलन भद्रमस्तु भव
ते रुद्राक्षमाले शिवं हा सोपानपरंपरां गिरिसुताकान्तालयालंकृतिं । अद्याराधनतोषिते
न विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ॥ एष्वपराध
हृदये पूर्वापरजन्मनोरमममनं भुक्त्वा पाते शास्त्रोपक्षेपो महामोहे सुखालोकोच्छेदित्वं च यथा
क्रममुक्तरूपं हेतुः ॥ १०॥ पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः वाच्यवाचकभावविविक्ते
नावगमनव्यापारेण यत्प्रतिपादनं तत्पर्यायेण भंग्यंतरेण कथनात्पर्यायोक्तं । यथा ॥ यं प्रेक्ष्य
चिररूढापि निवासप्रीतिरुज्झिता मदेनैरावणमुखे मानेन हृदये हरेः ॥ अत्रैरावणशक्रौ
मदमानमुक्तौ ज्ञाताविति व्यंग्यमपि शब्देनोच्यते । तेन यदेवोच्यते तदेव व्यंग्यं । यथा तु व्यं
ग्यं न तथोच्यते । यथा गवि शुक्ले चलति दृष्टे गौः शुक्लश्चलति इति विकल्पो यदेव दृष्टं तदेव
विकल्पयति । न तु यथा दृष्टं तथा । अभिन्नासंसृष्टत्वेन दृष्टं भेदसंसर्गाभ्यां विकल्पयति ॥
३१ ॥ उदात्तं वस्तुनः संपत् । संपत्समृद्धियोगः । यथा ॥ मुक्ताः केलिविसूत्रहारगलिताः संमा
र्जनीभिर्हृताः प्रातः प्रांगणसीम्नि मंथरचलद्बालांघ्रिलाक्षारुणाः ॥ दूराद्दाडिमबीजशंकित
धियः कर्षन्ति केलीशुकाः यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितं ॥ महतां चोपलक्ष
णं ॥ १५ ॥ उपलक्षणमंगभावः । अर्थादुपलक्षणीयेऽर्थे । उदात्तं । तदिदमरण्यं यस्मिन्नुदार

धयचनानुपानैर्ल्ल नव्यासनी॥ न च सन्ध्याकुसहाय्यश्चक्रे रक्षःक्षये रामः। न चात्र वीरो रसः
तस्येहागत्यात्॥३२॥ नहि सिद्धिहेतावेकस्मिन्नन्यत्रान्यत् तत्करं भवेत्। स समुच्चयो सौ तस्य प्रस्तुतस्य
कार्यस्यैकस्मिन् साधके स्थिते साधकांतराणि यत्र संभवंति स समुच्चयः। उदा॰ दुर्वाराः स्मरमार्ग-
णाः प्रियतमो दूरे मनोत्युत्कं गाढं प्रेम नवं वयोतिकठिनाः प्राणाः कुलं निर्मलं। स्त्रीत्वं धैर्य-
विरोधि मन्मथसुहृत्कालः कृतांतोक्षमी नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठ॥
अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वंति तदुपरि प्रियतमदूरस्थित्याद्युपात्तं। एष एव समु-
च्चयः सद्योगे ऽसद्योगे सदसद्योगे च पर्यवस्यतीति न पृथक् लक्ष्यते। यथा कुलममलिनं
भद्रा मूर्तिर्मतिः श्रुतशालिनी भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखंडितं प्रकृतिसुभगा
ह्येते भावा अमीभिरयं जनो व्रजति सुतरां दर्पं राजंस्त एव तवांकुशाः॥ अत्र सतां योगः। दुष्को-
दाहरणे ऽसतां योगः। शशी दिवसधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखम-
नक्षरं स्वाकृतेः॥ प्रभुर्धनपरायणः सततदुर्गतः सज्जनो नृपांगणगतः खलो मनसि सप्त शल्या-
नि मे॥ अत्र शशिनि धूसरे शल्ये शल्यांतराणीति शोभनाशोभनयोगः। स त्वन्यो युगपद्या गुण-
क्रिया॥११॥ गुणौ च क्रिये च गुणक्रिये च गुणक्रियाः। क्रमेणोदा॰। विदलितसकलारिकुलं

तव बलमिदं समभवत्प्रभुविमलं च । अरिबलमुख्यानि नराधिप मलिनानि च तानि जातानि ॥१॥
अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे । नववारिधरोदयादहोभिर्भवितव्यं
च निरातपत्वरम्यैः ॥ कलुषं च तवाहितेष्वकस्मात्सितपंकेरुहसोदरश्रि चक्षुः । पतितं च मही
पतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥ धुनोति चासिं तनुते च कीर्त्तिं प्रसादेः कृपाण
पाणिश्च भवानूर्जितोऽस्य साधुवादाश्च सुराः सुरालये इत्यादेश्च दर्शनाद्व्यधिकरणे इत्येक
स्मिन्देशे इति च न वाच्यं ॥ ३३ ॥ एकं क्रमेणानेकस्मिन्पर्यायः । एकं वस्तु क्रमेणानेकस्मिन्भ
वति क्रियते वा यत्स पर्यायः । क्रमेण उदा॰ । श्रोणीबंधस्त्यजति तनुतां सेवते मध्यभागः पद्भ्यां मु
क्तास्तरलगतयः संश्रिता लोचनाभ्यां । धत्ते वक्षः कुचसचिवतामद्वितीयत्वमास्यं तद्गात्रा
णां गुणविनिमयः कल्पितो यौवनेन ॥ १ ॥ यथा वा । नन्वाश्रयस्थितिरियं तव कालकूट केनो
त्तरोत्तरविशिष्टपदोपदिष्टा । प्रागर्णवस्य हृदये वृषलक्ष्मणोथ कण्ठेऽधुना वससि वाचि पुनः
खलानां । यथा वा ॥ बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ॥ अधुना हृदयेप्येष मृगशावाक्षि ल
क्ष्यते । रागस्य वस्तुनो भेदेप्येकतयाध्यवसानादेकत्वमविरुद्धं । तं ताण सिरिसहोअररअ
णाहरणम्मि हिअअमेक्करसं । बिंबाहरेपिआणं णिवेसिअं कुसुमबाणेण । अन्यस्ततो
न्यथा । अनेकमेकस्मिन्क्रमेण भवति क्रियते वा यत्र सोन्यः । क्रमेण उदा॰ । मधुरिमरुचिरं

७८

78

वचः खलानाममृतहोऽप्यमेव पुष्यनक्ति। अथ कथयति मोहते तनुमंतर्गतमिव हालाहलं विषं
तदेव॥१॥ तरुहं न तभिन्ति मंदिरमिदं लब्धावकाशो दिवः सा धेनुर्जरती नदंति करिणामे
ता घनाभा घटाः॥ स क्षुद्रो मुसलध्वनिः कलमिदं संगीतकं योषितामाश्चर्यं दिवसैर्द्विजोऽयमि
यतीं भूमिं परां प्रापितः॥ अत्रैकस्यैव हानोपादानयोरविवक्षितत्वान्न परिवृत्तिः॥२४॥ अनुमा
नं तदुक्तं यत्साध्यसाधनयोर्वचः॥११७॥ पक्षधर्मान्वयव्यतिरेकित्वेन त्रिरूपो हेतुः॥ साधनं।
धर्मिण्ययोगव्यवच्छेदो व्यापकस्य साध्यं। यथा॥ यत्रैता लहरीचलाचलदृशो व्यापारयंति भ्रु
वं यत्तत्रैव पतंति संततममी मर्मस्पृशो मार्गणाः॥ तच्चक्रीकृतचापमंचितशरप्रेंखत्करः
क्रोधनो धावत्यग्रत एव शासनधरः सत्यं तदासां स्मरः॥ साध्यसाधनयोः पौर्वापर्यविपर्यये
कल्पनेनाधिक्यं वैचित्र्यमिति तन्न दर्शितं॥२५॥ विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः॥
अर्थाद्विशेष्यस्य। यथा॥ महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः॥ न सं
हतास्तस्य न भेदवृत्तयः प्रियाणि वांछंत्यसुभिः समीहितुं॥ यद्यप्यपुष्टार्थस्य दोषतामभिधा
नात्तन्निराकरणेन पुष्टार्थस्य स्वीकारः कृतः॥ यथापि च कनिष्ठत्वेन बहूनां विशेषणानामे
वमुपन्यासे वैचित्र्यमित्यलंकारमध्येयं गुणितः॥२६॥ व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगू

हृतं ११८ निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजो
क्तिः ॥ न चैषापह्नुतिः प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहासंभवात् ॥ उदा॰ शैलेन्द्रप्रतिपा
द्यमानगिरिजाहस्तोपगूढोल्लसद्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासंगभंगाकुलः ॥ हा
शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं शैलान्तःपुरमातृमण्डलगणैर्दृष्टोवताद्वः शि
वः ॥ अत्र पुलकवेपथू सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपह्नुतस्व
रूपौ व्याजोक्तिप्रयोजनतः ॥ ३७ ॥ किंचित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते । तादृगन्यव्यपोहा
य परिसंख्या तु सा स्मृता ॥ ११९ ॥ प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तरा
भावात्सदृशवस्त्वन्तरव्यवच्छेदाय यत्पर्यवस्यति सा भवेत्परिसंख्या ॥ अत्र च कथनं प्रश्नपू
र्वकं तदन्यथा च परिदृष्टं तथोभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारोस्या
भेदाः ॥ क्रमेणोदा॰ किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः किमेकान्ते ध्येयं चरणयुगलं कौ
स्तुभभृतः ॥ किमाराध्यं पुण्यं किमभिलषणीयं च करुणा यदासक्त्या चेतो निरवधिविमुक्त्यै
प्रभवति ॥ १ ॥ किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषाः ॥ किं चक्षु
रप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकं ॥ २ ॥ कौटिल्यं कचनिचये कर

चरणाधरदले पुरागस्ते काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥१॥ भक्तिर्भवे न विभवे
व्यसनं शास्त्रे न युवतिकामशास्त्रे। चिंता यशसि न वपुषि प्रायः परिदृश्यते महतां ॥१॥ यथोत्तरं चे
त्पूर्वस्य पूर्वस्यार्थस्य हेतुता। तदा कारणमाला स्यात् उत्तरमुत्तरं प्रति यथोत्तरं। उदा॰ जितेंद्रि
यत्वं विनयस्य कारणमित्यादि। हेतुमेतास्वहहेतोरभिधानमभेदतो हेतुरिति हेत्वलंकारोत्र नाल
क्षि। आयुर्घृतमित्यादिरूपो व्यपनभूषणानां कदाचिद्दहतीति वैचित्र्याभावात्। अविरलकम
लविकासः सकलालिमदश्च कोकिलानंदः। रम्योयमेति संप्रति लोकोत्कंठाकरः कालः॥ इत्यत्र
तु काव्यरूपतां कोमलानुप्रासमहिम्नैव समाम्नासिषुर्न हेतुत्वलंकारमहिम्ना इति पूर्वोक्तं
काव्यलिंगमेव हेतुः॥३॥ क्रियया तु परस्परं ॥१२०॥ वस्तुनोर्जनने ऽन्योन्यं अर्थयोरेकक्रियामु
खेन परस्परं कारणत्वे सत्यन्योन्यं नामालंकारः। उदा॰ हंसाण सरेहिं सिरी सारिज्जइ अह सरा
ण हंसेहिं। अन्नोन्नं चिअ एए अप्पाणं णवर गरुअंति। अत्रोभयेषामपि परस्परं जनकता
मिथः श्रीसारतासंपादनद्वारेण॥४०॥ उत्तरश्रुतिमात्रतः। प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा
सति ॥१२१॥ असकृद्यदसंभाव्यमुत्तरं स्यात्तदुत्तरं। प्रतिवचनोपलंभादेव पूर्ववाक्यं यत्र
परिकल्प्यते तदेकं तावदुत्तरं। उदा॰ वाणिअअ हत्थिदंता कुत्तो अम्हाण वग्घकत्ती ओ। जाव
लुलिआलअमुही घरम्मि परिसक्कए सुण्हा॥ हस्तिदंतव्याघ्रकृत्तीनामस्मदधीनत्वेन ताः प्र

य छेति। इत्येतद्वचनममुना वाक्येन समुन्नीयते। न चैतत्काव्यलिंगं उत्तरस्य तादृप्यानुपप
त्तेः॥ नहि प्रश्नस्य प्रतिवचनं जनको हेतुः। नापीदमनुमानं॥ एकधर्मिष्ठतया साध्यसाधन
योरनिर्देशात्‌। इत्यलंकारांतरमेवोत्तरं साधीयः। प्रश्नादनंतरं लोकातिक्रांतगोचरतयाय
दसंभाव्यरूपं प्रतिवचनं स्यात्तदपरमुत्तरं। अनयोश्च सकृदुपादानान्न चारुताप्रतीतिरि
ति सकृदिह कृतं॥ उदा॰ का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही। किं सोक्खं सुकलत्तं किं
दुग्गेज्झं खलो लोओ॥ प्रश्नपरिसंख्यायामन्यव्यपोहे तात्पर्यं इह तु वाच्य एव विश्रांतिरित्य
नयोर्विवेकः॥ ११॥ कुतोपलक्षितः सूक्ष्मोप्यर्थोन्यस्मै प्रकाश्यते॥ १२२॥ धर्मेण केनचिद्यत्र
तत्सूक्ष्मं परिचक्षते॥ कुतोप्याकारादिंगिताद्वा। सूक्ष्मस्तीक्ष्णमतिसंवेद्यः॥ उदा॰ वक्त्रस्यंदिस्वेद
बिंदुप्रबंधैर्दृष्ट्वा भिन्नं कुंकुमं कापि कंठे पुंस्त्वं तन्व्या व्यंजयंती वयस्या स्मित्वा पाणौ खड्गले
खां लिलेख॥ अत्राकृतिमालोक्य कयापि वितर्कितं पुरुषायितमसिलेखालेखनेन वैदग्ध्या
दभिव्यक्तिमुपनीतं। पुंसामेव खड्गपाणिताया योग्यत्वात्‌। यथा वा। संकेतकालमनसं विटं ज्ञा
त्वा विदग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितं॥ अत्र जिज्ञासितः संकेतकालः कया
चिदिंगितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः॥ १२॥
उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः॥ १२३॥ परः पर्यंतभागोऽवधिर्यस्य। धाराधिरोहिततया

तत्रैवोत्कर्षस्य विश्रान्तेः ॥ उदाहरणं ॥ राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधं ॥ सौ
धे तल्पं तल्पे वरांगनानंगसर्वस्वं ॥ १ ॥ भिन्नदेशतयात्यंतं कार्यकारणभूतयोः ॥ युगपद्धर्मयो
र्यत्र ख्यातिः सा स्यादसंगतिः ॥ ११४ इह यद्देशं कारणं तद्देशमेव कार्यमुत्पद्यमानं दृष्टं ॥ यथाग्नेर्धू
मादि ॥ यत्र तु हेतुफलरूपयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासनं सा
तयोः स्वभावोत्पन्नपरस्परसंगतित्यागादसंगतिः ॥ उदा॰ जस्सेअ वणो तस्सेअ वेअणा भण
इ तं जणो अलिअं ॥ दंतक्खअं कवोले वहुए विअणा सवत्तीणं ॥ एषा च विरोधबाधिनी न विरोधः
भिन्नाधारतयैव द्वयोरिह विरोधितायाः प्रतिभासात् ॥ विरोधे तु विरोधित्वमेकाश्रयनिष्ठम
नुरूपमपि पर्यवसितं ॥ अपवादविषयपरिहारेण त्वन्यस्य व्यवस्थितेः ॥ तथा चैव निदर्शि
तं ॥ ४४ ॥ समाधिः सुकरं कार्यं कारणांतरयोगतः ॥ साधनांतरोपकृतेन कर्त्रा यदक्लेशेन कार्य
मारब्धमाधीयते स समाधिर्नाम ॥ उदा॰ मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ॥ उपका
राय दिष्ट्येदमुदीर्णं घनगर्जितं ॥ ५५ ॥ समं योग्यतया योगो यदि संभावितः क्वचित् ॥ १२५ ॥ इ
दमनयोः श्लाघ्यमिति योग्यतया संबंधस्य नियतविषयमध्यवसानं चेत्तदा समं ॥ तत्सद्यो
गे ऽसद्योगे च ॥ यथा ॥ धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी रूपे देवोऽप्ययमनुप
मो दत्तपत्रः स्मरस्य ॥ जातं दैवात्सदृशमनयोः संगतं यत्तदेतच्छृंगारस्योपनतमधुना रा
ज्यमेकातपत्रं ॥ १ ॥ चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचितरचना

संविधा विधाता॥ यन्निंबानां परिणतफलस्फातिरास्वादनीया यज्ञैतस्याः केवलं न फला

केविदः काकलोकः॥४॥ क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात्॥ कर्तुः क्रियाफला

वाप्तिर्नैवानर्थश्च यद्भवेत्॥१२६॥ गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये। क्रमेण

च विरुद्धे यत्स एव विषमो मतः॥१२७॥ द्वयोरत्यंतविलक्षणतया यदनुपपद्यमानतये

व योगः प्रतीयते। यच्च किंचिदारभमाणः कर्त्ता क्रियायाः प्रणाशान्न केवलं अभीष्टं तत्फ

लं लभेत यावदप्रार्थितमप्यनर्थं विषममासादयेत्। तथा सत्यपि कार्यस्य कारणरूपा

नुकारे यत्तयोः गुणौ क्रिये च परस्परं विरुद्धतां व्रजतः स समविपर्ययमाला चतुरूपो वि

षमः क्रमेणोदा॰ शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना। अयं क्व च कुकूलाग्निकर्कशो

मदनानलः॥१॥ सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः। जग्रसे साश्रयं तत्र तमन्यः

सिंहिकासुतः॥२॥ सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा। तमालनी

ला शरदिंदुपांडु यशस्त्रिलोक्या आभरणं प्रसूते॥३॥ आनंदममंदमिमं कुवलयदललोच

ने ददासि त्वं। विरहस्त्वय्यैव जनितस्तापयति तरां शरीरं मे। अज्ञानं ददानं शरीरतापन

विरुध्यते। एवं। विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये। म

दविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा॥ इत्यादावपि विषमत्वयथा

८।

योगमुन्नेयं॥४७॥ महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात्॥ आश्रयाश्रयिणोः स्यातां तनू
अप्यधिकं तु तत्॥११८॥ आश्रितमाधेयमाश्रयस्तु तदाधारः। तयोर्महतोरपि विवक्षितदपेक्ष
यातनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यदधिकतरतां व्रजतस्त
द्विविधमधिकं नाम। क्रमेणोदा॰ अहो विशालं भूपाल भुवनत्रितयोदरं॥ माति मातुमशक्यो
ऽपि यशोराशिर्यदत्र ते॥१॥ युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत। तनौ ममु
स्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः॥४८॥ प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया॥
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते॥१२२॥ न्यक्कृतिं परमपि विपक्षं साक्षान्निरसितुम
सहेन केनापि यत्तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्कारः तदनीकप्रतिनिधितु
ल्यत्वात्प्रत्यनीकं। यथानीकेऽभियोज्ये तत्प्रतिनिधिभूतमपरं मूढतया केनचिदभियुज्यते
तथेह प्रतियोगिनि विजेये तदीयोन्यो विभिडीयते इत्यर्थः। यथा। त्वं विनिर्जितमनोभवरूपः
सा च सुंदर भवत्यनुरक्ता। पंचभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः। यथा वा॥
यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः॥ कांतवक्त्रसदृशाकृतिं कृती राहुरिं
दुमधुनापि बाधते॥१॥ इंदोरत्र तदीयतासंबंधिसंबंधात्॥४९॥ समेन लक्ष्मणा वस्तु वस्तु

८

नायन्निगूह्यते। भिन्नेनागंतुना वापि तन्मीलितमिति स्मृतं॥ ७०॥ सहजमागंतुकं वापि कि-
मपि साधारणं यल्लक्षणं तद्द्वारेण किंचित्केनचिदिह यद्वस्तु स्थगयेदेव बलीयस्तया विरोधी
यत् तन्मीलितमिति द्विधा स्मरंति। क्रमेणोदा॰ अपांगतरले दृशौ मधुरवक्रवर्णा गिरो वि-
लासभरमंथरा गतिरतीव कांतं मुखं। इति स्फुरितमंगके मृगदृशां स्वतो लीलया तदत्र
न मदोदयः कृतपदोपि संलक्ष्यते॥ अत्र हि करलतादिकमंगकस्य लिंगं स्वाभाविकं। साधा-
रणं च मदोदयेन। अत्राप्येतत्स्पर्शिनात्या ये कंदसुरे निवसंति सदा हिमाद्रेस्त्वत्तातंकितधि-
यो विवशा द्विषस्ते॥ अप्यंगमुत्पुलकमुद्वहतां सकंपं तेषामहो बत भियां न बुधोप्यभिज्ञः॥
अत्र सामर्थ्यादवसितस्य शैत्यस्यागंतुकतया तद्यभवयोरपि कंपपुलकयोस्तादात्म्यं॥
समानता चाभये घृपितयो रूपलक्षितत्वात्॥ ५०॥ स्थाप्यतेपोह्यते वापि यथापूर्वं परं
परं। विशेषणतया यत्र वस्तु सैकावली द्विधा। पूर्वं पूर्वं प्रति यत्रोत्तरोत्तरस्य वस्तुनो वीप्स-
या विशेषणभावेन स्थापनं निषेधो वा संभवति सा द्विधा बुधैरेकावलीति भण्यते। क्र-
मेणोदा॰ पुराणि यस्यां सवरांगनानि वरांगनारूपविशेषितांगयः॥ रूपं समुन्मीलितसद्वि-
लासमस्त्रं विलासाः कुसुमायुधस्य॥ न तज्जलं यन्न सुचारुपंकजं न पंकजं तद्यदलीन-
षट्पदं। न षट्पदोसौ न जुगुंज यः कलं न गुंजितं तन्न जहार यन्मनः। पूर्वत्र पुराणां वरांगनास्त्रा-
सामंगविशेषणतामुखेन रूपं तस्य विलासास्तेषामप्यस्त्रमिह समुनाक्रमेण विशेष-

८२

णं विधीयते॥उत्तरत्र निषेधेप्येवमेव योज्यं॥५१॥यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः॥
स्मरणं।यः पदार्थः केनचित्प्रकारेण नियतो यदा कदाचिदनुभूतो भूत्स कालान्तरे स्मृतिप्र-
बोधाधायिनि तत्समाने वस्तुनि दृष्टे सति यत्तथैव स्मर्यते तद्भवेत्स्मरणं।उदाहरणं।निम्न-
नाभिविवरेषु यदंभः प्लावितं चलदृशां लहरीभिः।तद्भवैः कुहकुहैः सुरनार्यः स्मारितासु-
कंठरुतानां।यथा वा।करज्जुअगहिअजसोआ थणमुहविणिवेसिआहरउडस्स।संभरि-
अ पंचजन्नस्स णमह कण्हस्स रोमंचं॥५२॥भ्रांतिमानन्यसंवित्तत्तुल्यदर्शने॥१३२॥तादृग्या-
न्यदप्रकरणिकं निर्दिश्यते।तेन समानमर्थादिह प्राकरणिकमाश्रीयते।तस्य तथाविधस्य
दृष्टौ सत्सांयदप्राकरणिकतया संवेदनं स भ्रांतिमान्।न चैष रूपकं प्रथमातिशयोक्तिः॥
तत्र वस्तुतो भ्रमस्याभावात्।इह चार्थानुगमेन सैं चेल्लायाः प्रवृत्तेः तस्य च स्फुटमेव प्रतिप-
न्नत्वात्।उदा॰ कपाले मार्जारः पय इति करांल्लेढि शशिनस्तनुच्छिद्रप्रोतान्बिसमिति करी
संकलयति।रतेते तल्पस्थान्हरति वनिताप्यंशुकमिति प्रभामत्तश्चंद्रो जगदिदमहो विभ्रम-
यति॥५३॥आक्षेप उपमानस्य प्रतीपमुपमेयता।तस्यैव यदि वा कल्प्या तिरस्कारनिबंधनं
॥१३३॥अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थ्येन यदुपमानमाक्षिप्यते।तदपि
च तस्यैवोपमानतया प्रसिद्धस्योपमानांतरविवक्षयानादरार्थमुपमेयभावः कल्प्यते।

तदुपमेयस्योपमानं प्रतिप्रतिकूलवर्तित्वादुभयरूपं प्रतीपं । क्रमेणोदा० । लावण्यौक-
सि सप्रतापगरिमण्यग्रेसरे त्यागिनां देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ॥ इंदुः
किं घटितः किमेष विहितः पूषा किमुत्पादितं चिंतारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्मा-
भृतः ॥ एष हि त्वसुंदरि एणकुलं दृग्गुणेन स्तनगुणेन सुवक्त्रेणेंदुर्जिता । तुल्यमुखहेणक्षि सोऽरिचंद्रोऽ-
वमिंदुर्हरात् ॥ अत्र मुखेनोपमीयमानस्य शशिनोऽन्यतरगुणत्वादुपमित्यसंनिष्पत्याव-
वक्त्रेणेंदुर्जित इति पदाभिव्यंग्यतया तिरस्कारः ॥ क्वचित्तु निष्पन्नैवोपमितिक्रियाऽनादर-
निबंधनं यथा ॥ गर्वमसंवाह्यमिमं लोचनयुगलेन वहसि किं मुग्धे । संतीदृशानि दिशि दिशि
सरस्सु ननु नीलनलिनानि ॥ इहोपमेयीकरणमेवोत्पलानामनादरः । अनयैव रीत्याय-
दसामान्यगुणयोगान्नोपमानभावमात्यनुभूतपूर्वं । तस्य तत्कल्पनायामपि भवति प्र-
तीपमिति प्रत्येतव्यं । यथा । अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म तात दृप्यः । ननु
संति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानां ॥ अत्र हालाहलस्योपमानत्वमसं-
भाव्यमेव पदनिबद्धं ॥ ५४ ॥ मस्त्वेकं तस्य यदन्येन गुणसाम्यविवक्षया एकात्म्यं बध्यते यो-
गात्तत्सामान्यमिति स्मृतं ॥ १३४ ॥ अतादृशमपि तादृशतया विवक्षितं यद्वस्त्वेकं तत्तदर्थे-
न संपृक्तमपरित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते तत्सामान्यगुणसंबंधात्सा-

८३

मान्यं॥ उदा॰ मलयजरसविलिप्ततनवो नवहारलताविभूषिताः सिततरदंतपत्रकृतवक्त्ररु
चौ रुचिरामलांशुकाः शशभृति विमलधाम्नि धवलयति धरामविभाव्यतां गताः प्रियवसतिं
प्रयांति सुखमेव निरस्तभियोभिसारिकाः॥ अत्र प्रस्तुततदन्ययोरन्यूनानतिरिक्ततया नि
बद्धं धवलत्वमेकात्मताहेतुः॥ अत एव पृथग्भावेन न तयोरुपलक्षणं। यथा वा। वेत्रत्वचा तुल्य
रुचां वधूनां कर्णाग्रतो गंडतलागतानि॥ भृंगाः सहेलं यदि नापतिष्यन् को वेदयिष्यन्नवचंप
कानि। अत्र निमित्तांतरजनितापि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सह
ते। प्रतीतस्य प्रतीतेश्च बाधायोगात्॥ ५५॥ विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः।
एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरं॥ १३५॥ अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः। तथै
व करणं चेति विशेषस्त्रिविधः स्मृतः॥ १३६॥ प्रसिद्धाधारपरिहारेण यदाधेयस्य विशिष्टा स्थि
तिरभिधीयते स प्रथमो विशेषः। उदा॰ दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषां। र
मयंति जगंति गिरः कथमिव कवयो न ते वंद्याः॥ एकमपि वस्तु यदेकेनैव स्वभावेन युगपदनेकत्र
वर्त्तते स द्वितीयः। उदा॰ सा वसइ तुज्झ हिअए स च्चिअ अच्छिसु सा अ वअणेसु। अह्मारिसाण सुं
दर अवआसो कत्थ पावाणं। यदपि च किंचिदारभमाणस्तेनैव यत्नेनाशक्यमपि कार्यां
तरमारभते सोप्यपरो विशेषः॥ उदा॰ स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यं।

विधिना ससस्त्रेन वामनेनाम्रभुवि सत्यं सविता बृहस्पतिश्च। यथा वा ॥ म्रहिल्लीसचिवः सखीभि
यः प्रियशिष्यालालितेन कृता विधौ। करुणाविमुखेन मृत्युना हरता त्वां वत किं न मे हृतं ॥ सर्वत्र
चैवं विधे विषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते। तां विनाऽप्रायेणालंकारत्वायोगात् ॥
अत एवोक्तं। सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ॥ यत्नोऽस्यां कविना कार्यः कोऽलंकारो
ऽनया विनेति ॥ ५६ ॥ स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत्। वस्तु तद्गुणतामेति भण्य
ते स तु तद्गुणः ॥ १३७ ॥ वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसंप
दापरक्तं तत्प्रतिभासमेव यत्समासादयति स तद्गुणः। तस्याप्रकृतस्य गुणोऽत्रास्तीति। उदा.
विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या। रत्नैः पुनर्यत्र रुचं रुचा स्वामानिन्यिरे
वंशकरीरनीलैः ॥ अत्र रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां प्रगुणव
र्णता ॥ ५७ ॥ तद्रूपाननुहारश्चेदस्य तत्स्यादतद्गुणः। यदि तु तदीयं वर्णं संभवंत्यामपि योग्यता
यामिदं न्यूनगुणं न गृह्णीयात्तदा भवेदतद्गुणो नाम। उदा. धवलोऽसि जइ वि सुंदर तह वि तुए मज्झ
रंजिअं हिअअं। राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तो सि। अत्रातिरिक्तेनापि मन
सा रंगयुक्तेन रक्ततामनुपगतेत्यतद्गुणः। किंच मद्दिस्य ग्रहणमस्येति च॰ ग्रहणमत्र निर्दिश्यप
तोऽतेन यद्ग्रहणं तस्य स्वरूपं ग्रहणेन कुतोऽपि निमित्तान्नानुविधीयते सोऽप्यतद्गुण इत्यपि

८४

सेतव्यं॥ यथा। गांगमंबु सितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः॥ राजहंस तव सैव शुभ्र
ता चीयते न च न चापचीयते॥ ५८॥ यद्यथा साधितं केनाप्यपरेण तदन्यथा॥ १३॥ तथैव यद्वि
धीयते तस्य व्याघात इति स्मृतः। येनोपायेन यत्केनोपकल्पितं तस्यान्येन विजिगीषुतया तदु
पायकमेव यदन्यथाकरणं स समाधितवस्तुव्याहतिहेतुत्वाद्व्याघातः। उदा॰ दृशा दग्धं मन
सिजं जीवयन्ति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः॥ ५९॥ सेष्टाः संसृ
ष्टिरेतेषां भेदेनैकत्र या स्थितिः॥ १३९॥ एतेषां समनन्तरमेवोक्तस्वरूपाणामलंकाराणां
यथासंभवमन्योन्यनिरपेक्षतया यदिह शब्दभाग एवार्थविषय एव चोभयत्रापि वाव
स्थानं सैकार्थसमवायस्वभावा संसृष्टिः। तत्र शब्दालंकारसंसृष्टिर्यथा। वदनसौरभलो
भपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया। चलितया विदधे कलमेखलाकलकलोलदृशान्यथा।
अर्थालंकारसंसृष्टिर्यथा। लिंपतीव तमोंगानीत्यादि। पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रा
सौ संसृष्टिमुपजनयतः। उत्तरत्र तु तथाविधावुपमोत्प्रेक्षे। शब्दार्थालंकारयोः संसृष्टिर्यथा। सो
ण्हमिगामजो एअं मह महंतलावण्णं। तरुणाण हिअअलूडिं परिसक्कंतिं णिवारेइ। अत्रानु
प्रासो रूपकं चान्योन्यानपेक्षे। संसर्गश्च तयोरेकत्र काव्ये छन्दसि वा समवेतत्वात्॥ ६०॥ अवि
श्रान्तिजुषामात्मन्यंगांगित्वं तु संकरः। एत एव तु यत्रात्मानमनासादितस्वतन्त्रभावाः परस्परम
नुग्राह्यानुग्राहकतां दधति स एषां संकीर्यमाणस्वरूपत्वात् संकरः। उदा॰ आत्ते सीमंतरत्ने म

रक्तांनिनिहितेहेमतारंकूपत्रेलुसायांमेखलायांइतिमणितुलाकोटियुग्मगृहीते। शोणंबिं
बोष्ठकांत्यावदरिमगदस्माभितवरीणमरण्येराजन्गुंजाफलानांस्त्रजइतिशबरानैवहा
रंहरंति॥ अत्रतद्गुणमपेक्ष्यभ्रांतिमताप्रादुर्भूतं॥ तदाश्रयेणचतद्गुणः सचेतसांगमू
तत्त्वमाक्षिप्तिनिमित्तमिवसतयोरंगांगिभावः॥ यथावा। ज्ञकालाभिर्भाभिस्करध्वतकलंका
क्षवलयोविषयोभिव्यापत्नेरिवकूलितवैराग्यविनादः। परिजंस्वत्तारापरिकूरकपालांकि
ततलेशशीभस्मापांडुःपित्तवनइवव्योम्निचरति। उपमारूपकमुत्प्रेक्षाश्लेषश्चेतिच
त्वारोत्रपूर्ववदंगांगितयाप्रतीयंते। कूलंकएवाक्षवलयमितिचरूपकपरिग्रहेकूरध्व
तत्वमेवसाधकप्रमाणतांप्रतिपद्यते। अस्यहिरूपकत्वेनिरोहितकूलंकरूपमक्षवलय
मेवमुख्यतयावगम्यतेतस्यैवचकरग्रहणयोग्यतायांसार्थत्रिकीप्रसिद्धिः श्लेषच्छायया
तुकलंकस्यकरधारणमसदेवप्रत्यासत्त्योपचर्यते। शशांकेनकलंकस्यमूर्सेवोढ
हनात्। कलंकोक्षवलयमिवेतिउपमायांकलंकस्योत्कटतयाप्रतिपत्तिः। नचास्यकर
ध्वतत्वंतत्वतोस्तीतिमुख्यप्रपचारएवशरणंस्यात्। एवंरूपश्चसंकरःशब्दालंकारयो
रपिदृश्यते। यथा। राजतिनटीयममिहतत्तानवरासातिपातिसारावनदागडताचयू

पमविरतदानवरासातिपातिसारावनदा। अत्रयमकमनुलोमप्रतिलोमश्चित्रभेदःपाद
द्वयगतेपरस्परापेक्षे। एकस्यचग्रहेन्यायदोषाभावादनिश्चयः॥१५०॥ द्वयोर्बहूनांवाऽलं
काराणामेकत्रसमावेशेपिविरोधान्नयत्रयुगपदवस्थानसंभवः। नचैकतरस्यपरिग्र
हेसाधकं। नदितरस्यवापरिग्रहेबाधकमस्ति। येनैकतरएवसपरिगृह्येतसनिश्चया
भावरूपोद्वितीयःसंकरः। समुच्चयेनसंकरस्यैवाक्षेपात्। उदा॰ जहगंभीरोजहरअणणि
ब्भरोजहअणिम्मलच्छाउ। ताकिंविहिणासोसुरसवाणिउ जलणिहीणकउ॥ अत्र
समुद्रेप्रस्तुतेविशेषणसाम्यादप्रस्तुतार्थप्रतीतेःकिंसमासोक्तिः। किमप्रस्तु
तस्यमुखेनकस्यातत्समानगुणतयाप्रस्तुतस्यप्रतिपत्तेरियमप्रस्तुतप्रशंसेति
संदेहः। यथावा। नयनानंददायींदोर्बिंबमेतत्प्रसीदति। अधुनापिनिरुद्धाशमविशी
र्णमिदंतमः। अत्रचकिंकामस्योद्दीपकःकालोवर्त्ततइतिभंग्यंतरेणाभिधानात्पर्यायो
क्तं। उतवदनस्येंदुबिंबतयाध्यवसानादतिशयोक्तिः। किंवैतदितिवक्तुर्निर्देश्यतद्रूपा
रोपवशाद्रूपकं। अथवातयोःसमुच्चयविवक्षायांदीपकं। अथवातुल्ययोगिता। किं
मुखप्रदोषसमयेविशेषणसाम्यात्ताननस्यावगतौसमासोक्तिः। अहोस्विन्मुखनेमे

त्वत्प्रसादादगस्त्यतमः शंसा। इति बहूनां संदेहादयमेव संकरः। यत्र तु न्यायदोषयोरन्यत
रस्यावतारस्तत्रैकतरस्य निश्चयान्न संशयः। न्यायश्च साधकत्वमनुकूलता। तत्र सौभा
ग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिरित्यत्र मुखस्य नम्यमाना हासद्यु
तिर्वक्त्र एवानुकूल्यं भजत इत्युपमायाः साधकं। शशिनि तु न तथा प्रतिकूलेति न रूपकं
प्रति तस्या बाधकता। वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गत इत्यत्रापरत्वमिन्दो
रनुगुणं न तु वक्त्रस्य प्रतिकूलमिति रूपकस्य साधकतां प्रतिपद्यते। न तूपमाया बाध
कतां। राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरमित्यत्र पुनरालिङ्गनमुपमां निरस्य
ति। सदृशं प्रति प्रेयसीप्रयुक्तायालिङ्गनस्यासंभवात्। आनंदमंथरपुरंदरमुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य। पदांबुजं भवतु वो विजयाय मञ्जुमञ्जीरशिञ्जितमनो
हरमंबिकायाः॥ इत्यत्र मंजीरशिंजितमंबुजे प्रतिकूलमसंभवात्। इति रूपकस्य बाधकं
न तु पादे अनुकूलमित्युपमायाः साधकमभिधीयते विष्णूपमादि नो बाधकस्य तदवे
क्षयोलक्ष्ये न प्रतिपत्तेः। एवमन्यत्रापि सुधीभिः परिक्ष्यं। स्फुटमेकत्र विषये शब्दा
र्थालंकृतिद्वयं। व्यवस्थितं च। अभिन्ने एव पदे स्पष्टतया यद्युक्तावपि शब्दालंकारो
व्यवस्थो समासादयतः सोप्यपरः संकरः। यथा। स्पष्टोल्लसत्किरणकेसर

सूर्यबिंबधिस्त्रीणि कृतिक्रमथोऽदिवसारविंदं॥ त्रिविष्टाष्टदिग्दलकलापमुषावतारब
बद्धांधकारमधुपावलिसंचुकोच॥ अत्रैकपदानुप्रविष्टो रूपकानुप्रासौ। तेनासौ त्रिरू
पः परिकीर्तितः॥८१॥ तदयमनुग्राह्यानुग्राहकतया संदेहेनैकपदप्रतिपाद्यतया च व्यव
स्थितत्वात्त्रिप्रकारतयैव संकरो व्याकृतः॥ प्रकारांतरेण तु न शक्यो व्याकर्तुं। आनंत्यात्त
द्भेदानामिति। प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यमुपेतालंकाराः॥८२॥ कुतः पुन
रेष नियमो यदेतेषां तुल्येपि काव्यशोभातिशयहेतुत्वे कश्चिदलंकारः शब्दस्य कश्चिदु
भयस्येति चेत्। उच्यते अत्र। यथा काव्ये दोषगुणालंकाराणां शब्दार्थोभयगतत्वेन व्यवस्था
यामन्वयव्यतिरेकावेव प्रभवतो निमित्तांतराभावात्॥ ततश्च योऽलंकारो यदीयान्वय
व्यतिरेकावनुविधत्ते स तदलंकारो व्यवस्थाप्यत इति॥ इत्थं च यथा पुनरुक्तवदाभासः
परंपरितं रूपकं चभयोर्भावाभावानुविधायितयोभयालंकारौ। तथा शब्दहेतुकार्थांत
रन्यासप्रभृतयोपि द्रष्टव्याः॥ अर्थस्य तु तत्रैव वैचित्र्यमुत्कटतया प्रतिभासनादुक्तितो वा
च्यालंकारमध्ये व्यवस्थितिमनपेक्ष्यैव लक्षिताः॥ योऽलंकारो यदाश्रितः स तदलंकार इत्य
पि कल्पनायामन्वयव्यतिरेकावेव समाश्रयितव्यौ। तदाश्रयणमंतरेण विशिष्टस्या
श्रयाश्रयिभावस्याभावादिह्यलंकाराणां यथोक्तनिमित्त एव परस्परं व्यतिरेको ज्ञाया

न्ना॥ एवां दोषाय यथा योगं संभवंतोपि केचनाउक्ता एवं तर्भवंतीति न पृथक् प्रतिपादिताः॥१४२॥ त
था हि। अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोधश्चेति ये त्रयो दोषास्ते प्रसिद्धिविरुद्धता
मपुष्टार्थत्वं प्रतिकूलवर्णतां च यथाक्रमं नातिक्रामंति। तस्य च त्रावल्यात्॥ क्रमेण दा॰ चक्री
चक्रार पंक्तिं हरिरपि च हरीन्धूर्जटिर्धूर्ध्वजांतान् अक्षं नक्षत्रनाथोरुणमपि वरुणः कूबराग्रं
कुबेरः॥ रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोन्वहमहि
मरुचेः सोवतात्स्यंदनो वः॥ अत्र कृतकर्म प्रतिनियमेन स्फुतिरनुप्रासानुरोधेनैव प्रतिपा
दिता न पुराणेतिहासादिषु तथा प्रतीतेति प्रसिद्धिविरोधः॥ भण तरुणि रमणमंदिरमानं
दस्पंदि सुंदरेंदुमुखि यदि सलीलोल्लापिनि गच्छसि तत्किं त्वदीयं मे॥१॥ अनणुरणन्मणि
मेखलमविरतसिंजानमंजुमंजीरं॥ परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥
अत्र वाच्यस्य विविच्यमानं न किंचिदपि चारुत्वं प्रतीयत इत्यपुष्टार्थतैवानुप्रासस्य वैफ
ल्यं। अकुंठोत्कंठया पूर्णमित्यादि। अत्र शृंगारे परुषवर्णाडंबरः पूर्वोक्तरीत्या विरुद्ध इत्
ति पुरुषानुप्रासेत्र प्रतिकूलवर्णतेव वृत्तिविरोधः। यमकस्य पादत्रयगतत्वेन यमनमप्र
युक्तत्वं दोषः॥ यथा भुजंगमस्येव मणिः सदंभा ग्राहावकीर्णेव नदी सदंभाः। दुरंतनां निर्ण
यतोपि जंतोः कर्षति चेतः प्रमुखे सदंभाः। उपमायामुपत्रानस्य जातिपरिमाणगतं न्यूनत्व


मधिकत्वाच्चतादृस्यमनुचितार्थत्वं दोषः॥ धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिक
पदतां च न व्यभिचरतः॥ क्रमेणोदा॰ चंडालैरिव युष्माभिः साहसं परमं कृतं॥ वह्निस्फुलिंग इव
भानुरयं चकास्ति॥ अथ पद्मासनासीनश्चर्वाको दिराजते॥ युगादौ भगवान्वेधा विनिर्मित्सुरिव प्र
जाः॥ पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ॥ वेणीदंडः पुनरयं कालिंदीपात्रसन्निभः॥ अत्र चंडा
लादिभिरुपमानैः प्रस्तुतोऽर्थोऽत्यंतमेव कदर्थित इत्यनुचितार्थता॥ स मुनिर्लांछितो मौंज्या कृष्णाजिनप
टं वहन्॥ व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान्॥ अत्रोपमानस्य मौंजीस्थानीयस्तडिल्लक्ष
णो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वं॥ स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप
कृष्णः॥ शतह्रदेंद्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः॥ अत्रोपमेयस्य शंखादेरनिर्देशे शशि
नो ग्रहणमतिरिच्यत इति अधिकपदत्वं॥ लिंगवचनभेदोप्युपमानोपमेययोः साधारणं चेद्धर्ममन्यरूपं
कुर्यात्तदैकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा गतीयमा
नेनापि धर्मेण जातीयत इति प्रक्रांतस्यार्थस्य स्फुटमनिर्वाहादस्य ज्ञानमक्रमरूपत्वं॥ यथा॥ चिंतार
त्नमिव च्युतोसि करतोधिन्नदभाग्यस्य मे॥ सत्क्रवोमाधिक्षिता देवस्य द्वाः कुलवधूरिव॥ यत्र तु नात्वेपि लिंग
वचनयोः सामान्याभिधायि पदं स्वरूपभेदं नापद्यते न तत्रैतद्दूषणावतारः। उभयथार्थस्यानुगमक्षम
स्वभाववत्वात्॥ यथा॥ गुणैरनर्घैः प्रथितो रत्नैरिव महार्णवः॥ तद्वत्तासदृशोन्याभिः स्त्रीभिर्मधुरता

न्तनः॥ दधते स्म परां शोभां तदीया विभ्रमा इवेति॥ कालपुरुषविध्यादिभेदेपि न तथा प्रतीतिरस्खलि
तरूपतया विश्रांतिमासादयतीयसावपि भग्नप्रक्रमतयैव व्याप्तः। यथा। अतिथिं नाम काकुत्स्था
त्पुत्रमाप कुमुद्वती॥ पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना॥ अत्र चेतना प्रसादमाप्नोति न पुनरा
पेति कालभेदः॥ त्वय्यग्रमङ्गनयिशेषविविक्तमूर्तिः कौसुमरागरुचिरस्फुरदंशुकांता॥ विभ्राजसे म
करकेतनमर्चयंती बालप्रवालविटपप्रभवा लतेव॥ अत्र लता विभ्राजते न तु विभ्राजस इति संबोध्य
मानविष्ठस्य पुरुषभागस्यासंबोध्यमानविषयतया व्यत्यासात्पुरुषभेदः॥ गंगेव ते प्रवहतु सदेवकी
र्तिरित्यादौ च गंगा प्रवहति न तु प्रवहत्विति प्रवृत्तप्रवर्तनात्मनो विधेः॥ एवंजातीयकस्य चान्यस्या
र्थस्योपमानगतस्यासंभवाद्विध्यादिभेदः॥ ननु समानमुच्चरितं प्रतीयमानं वा धर्मांतरमुपादाय
पर्यवसितायामुपमायामुपमेयस्याप्रकृतधर्माभिसंबंधान्न कश्चित्कालादिभेदोस्तीति। यत्राप्युपा
त्तेनैव सामान्यधर्मेणोपमावगम्यते। यथा युधिष्ठिर इवायं सत्यं वक्तीति। तत्र युधिष्ठिर इवायं स
त्यं वदतीति प्रतिपद्यामहे। सत्यवादी सत्यं वदतीति वचनयोर्न रूच्यमाशंकनीयं॥ रैवायं पुष्कातीव
युधिष्ठिरस्य सत्यवदनेन सत्यवाद्युपमिस्पर्धी वागमात्॥ सत्यमेवमेतत्॥ किंतु स्थितेषु प्रयोगेषु सम
र्थनमेतत्। न तु सर्वथा निरवद्यो। प्रस्तुतवस्तुप्रतीतिविघातात्। इति सचेतस एवात्र प्रमाणं। असाद
रूपासंभवाद्वा यथोपमायामनुचितार्थतायामेव पर्यवस्यतः। यथा। ग्रथ्नामि काव्यशशिनं विततार्थरश्मिं

अत्र कातरस्य ग्रासिनामर्थानां च रश्मिभिः साधर्म्यं क्वापि न प्रतीतमिति सनुचितार्थत्वं ॥ यथा वा ॥ भियेतुरा
स्यादिव तस्य दीप्ताः शराः धनुर्मण्डलमध्यभाजः ॥ जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषणो
कीत्र ॥ अत्रापि ज्वलतोऽम्बुधाराः सूर्यमण्डलान्निःपतन्त्यो न संभवन्तीति उपनिबध्यमानोऽर्थोऽनौचित्यमेव
पुष्णाति ॥ उत्प्रेक्षायामपि संभावनं ~~तस्य~~ चात्रो ध्रुवेवादय एव शब्दा बुद्धमुत्सहन्ते । न यथाशब्दोऽपि । केवल
मस्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वान्न संभावनं तस्य चात्राविवक्षितत्वादिति तत्राशक्तस्या
नाचकत्वं दोषः ॥ यथा ॥ उद्ययौ दीर्घिकागर्भान्मुकुलं मेचकोत्पलं ॥ नारीलोचनचातुर्यशंकासंकुचि
तं यथा ॥ उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वान्निरूपाख्यप्रख्यं । तत्समर्थनाय यदर्थान्तर
न्यासस्योपादानं तत्तले ख्यामिव गगनतले प्रतमसमीचीनमिति निर्विषयत्वमेवास्य स्यानुचितार्थ
तैव दोषः ॥ यथा ॥ दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारं ॥ क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैःशिरसामतीव ॥ अत्राचेतनस्य तमसो दिवाकरात्रास एव न संभवति कुत एतद्भयोज्झितमद्रि
णा परित्राणं । संभावितेन रूपेण प्रतिभासमानस्यास्य न कदाचिदनुपपत्तिरवतरतीति व्यर्थ एव त
त्समर्थनार्थो यत्नः ॥ साधारणविशेषणवशादेव समासोक्तिरनुक्तमप्युपमानविशेषं प्रकाशयतीति
तस्यात्र पुनरुपादाने प्रयोजनाभावादनुपादेयतायां यत्तदुपादानं तदपुष्टार्थत्वं पुनरुक्तता वा दो
षः ॥ यथा ॥ स्पृशन्ति तिग्मरुचौ ककुभः करैर्दयितमेव विजृम्भिततापया ॥ अतनुमाननपरिग्रहया स्थि
तं रुचिरया चिरयापि दिनश्रिया ॥ अत्र तिग्मरुचेः ककुभां च यथासंख्यं विशेषणवशेन व्यक्तिविशेषपरिग्र

नंबर ५१

हेएा च नायकृतया व्यक्तिः॥ तथाग्नीष्व आदिवसश्रियापि प्रतिनायिकात्वेन भविष्यतीति किं दयितयेति स्व
शब्दोपादाने पुनः। श्लेषोपमायास्तु सर्वविषयो यत्रोपमानस्योपादानमेतरेण साधारणेऽपि विशेषणे
पुनः तथा प्रतीतिर्यथा। स्वयं च पलवाताम्रे साद्रा अप्रस्तुतप्रशंसायामुपमेयमनयैव रीत्या प्रती
तं न पुनः प्रयोगेणाकूदर्थनानेयं॥ यथा॥ आहूतेषु विहंगमेषु मशको नायान्पुरो वार्यते मध्ये वारिधि
वासवत्तृणमणिर्धत्ते मणीनां रुचं॥ खद्योतोपि न कंपते प्रचलितुं मध्येपि तेजस्विनां धिक्सामान्य
मचेतनं प्रभुमिवानामृष्टतत्वांतरं॥ अत्राचेतनः प्रभोरप्रस्तुतविशिष्टसामान्यद्वारेणाभिव्यक्तेर
युक्तमेव कथनं। तदेतेऽलंकारदोषा यथासंभविनोप्यन्येप्येवंजातीयकाः पूर्वोक्तेष्वेव दोषजातेष्वंत
र्भाविता न पृथक्प्रतिपादनामर्हंतीति संपूर्णमिदं काव्यलक्षणम्॥ ॥इति श्रीकाव्यप्रकाशेऽ
र्थालंकारनिर्णयो नाम दशम उल्लासः॥ ॥इत्येष मार्गो विदुषां विभिन्नोप्यभिन्नरूपः प्रतिभासते य
त्॥ न तद्विचित्रं यदमुत्र सम्यग्विनिर्मिता संघटनैव हेतुः॥ ॥इति श्रीमद्राजानकमम्मटयोः कृतिः
काव्यप्रकाशनामकः॥ काव्यस्वरूपदोषगुणालंकारनिरूपणग्रंथः समाप्तः॥ शुभमस्तु॥ काव्य
ज्ञते व्याकरणे मीमांसे तर्के चातुरी॥ बोधः काव्यप्रकाशस्य गुरोः शिष्ये च हेतवः॥



प्रका १ कं० ५१ १८००